DÁYA TATWA,

A

TREATISE

On the Law of Inheritance,

BY

RAGHUNANDANA BHATTÁCHÁRYA.

EDITED BY

LAKSHMI NÁRÁYAN SERMÁ,

Librarian, Sanscrit College.

PUBLISHED UNDER THE AUTHORITY OF THE COMMITTEE

OF

Public Instruction.

PRINTED AT THE EDUCATION PRESS.

1828.

18[illegible]

Digitized by Google

BIBLIOTHECA
REGLA
MONACENSIS.

Digitized by Google

श्रीरघुनन्दनभट्टाचार्य्यविरचितं

दायतत्त्वं

श्रीयुतकर्मिष्ठिसाङ्घेवानुज्ञया

कलिकातराजधान्यां इडुकेशन् मुद्रायन्त्रालये

श्रीलक्ष्मीनारायणशर्म्मणा शोधितं मुद्रितञ्च

॥ सम्वत् १८८५। शकाब्दे १७५०॥

Digitized by Google

॥ अथ दायतत्त्वस्य सूचीपत्रं ॥

प्रकरणं	पृष्ठाङ्काः	पङ्क्त्यङ्काः
दायभागशब्दार्थकथनं	१	८
तत्र स्वत्वविचारः	२	६
भागविशेषकथनं	७	७
एकदायादिविभागकथनं	७	१२
स्वस्वदेशजात्यादिव्यवहृतशास्त्रेण दायभागनिर्णयकथनं	७	१५
पितृकृतविभागकथनं	८	१
विषमविभागे विशेषकथनं	८	१०
अथथाशास्त्रविभागे पितुर्स्वप्रभुत्वं	८	१२
विषमविभागनिषेधः	८	१६
पैतामहमन्यैर्धृतं पित्रोद्धृतं तदकामतोन विभजनीयं	९	१
अनुद्धृतेपि मध्यादौ पितुरेवास्वाच्छन्द्यं	९	९
भ्रात्राद्युद्धृतस्थावरविभागकथनं	९	१३

Digitized by Google

प्रकरणं	पृष्ठाङ्काः	पङ्क्त्यङ्काः
पितृकृतविभागे विमातुर्भागप्राप्तिः	१०	१
पैतामहधने पितापुत्रयोस्तुल्यं स्वामित्वं	१०	१८
पैतामहे पितुर्भागद्वयकथनं	१२	१
पितामहधनविभागकालः	१२	१४
विभागानन्तरजातस्य विभागः	१४	२
औरसेन सहदत्तकादेर्विभागकथनं	१४	६
शूद्रस्य दासीपुत्रविभागकथनं	१५	१
अनियोगोत्पन्नक्षेत्रजस्यौरसेन सह विभागकथनं	१५	८
उपरते पितरि भ्रातॄणां विभागः	१५	१७
ऋणं दत्वा शेषं विभजेत्	१६	१
मातरि जीवन्त्यां विभागेन धर्म्यः	१६	६
यद्वितु विभज्येत तद्मातुः पुत्रतुल्यांशप्राप्तिकथनं	१६	१४
द्विप्रकारविभागकथनं	१६	१८
ज्येष्ठप्रसंशा	१७	४
अप्राप्तव्यवहारादीनां व्यवस्था	१८	४
विभागमनीहमानस्य व्यवस्था	१८	८
असंस्कृतभ्रात्रादीनां संस्कारकथनं	१८	१

Digitized by Google

प्रकरणं	पृष्ठाङ्काः	पङ्क्त्यङ्काः
विभागानधिकारिकथनं	१८	१५
विभाज्याविभाज्यकथनं	२१	१२
विद्याधनकथनं	२३	११
अर्जकस्यांशद्वयकथनं	२४	५
गोप्रचारादीनामविभाज्यत्वं	२४	१६
साधारणधनार्ज्जिते विशेषकथनं	२६	१४
कुलोपार्जितविद्यालब्धधनेविभागकथनं	२३	१८
साधारणस्थावरस्य देयादेयकथनं	२७	१
आपत्काले एककर्तृकस्थावरविक्रयानुमतं	२८	१५
कुटुम्बार्थंऋतर्णादिकं स्वामिनादेयं	३०	१
विभागसन्देहनिर्णयकथनं	३१	१६
चिरप्रोषितस्यागतस्य वंशस्य विभागः	३४	५
भोगसिद्धासिद्धकथनं	३४	११
चैपुरुषिकभोगकथनं	३५	१०
भुक्तिशोधनकथनं	३६	६
विभागकाले निह्नुतस्य पश्चाद्वगतस्य विभागः	३६	८
दायादकर्तृकभुक्तद्रव्यस्य न विभागेप्रवेशः	३८	१७
निधिप्राप्तिस्थले व्यवस्थाकथनं	४०	४

Digitized by Google

प्रकरणं	पृष्ठाङ्काः	पङ्क्त्यङ्काः
अथ स्त्रीधनकथनं	४०	१४
स्त्रीधृताभरणादीनां विभजनीयः	४१	१
सौदायिकधनकथनं	४१	५
स्थावरे विशेषकथनं	४१	१३
व्यभिचारिस्त्रियै स्त्रीधनेनाधिकारः	४२	१
दुर्भिक्षादौ स्त्रीधने पत्युरधिकारः	४२	२
स्त्रीधनाधिकारिकथनं	४२	१०
अथ यौतुकधनाधिकारिकथनं	४३	१४
ब्राह्मादिपञ्चकविवाहकालब्ध धने पुत्राद्यभावे भर्तुरधिकारः	४५	६
आसुरादित्रयविवाहलब्ध धने मात्राद्यधिकारः	४५	७
कन्याधनाधिकारिक्रमकथनं	४५	१३
पूर्वोक्तानामभावे स्त्रीधनाधिकारिकथनं	४५	१८
अथा पुत्रधनाधिकारिक्रमकथनं	४८	४
संसृष्टिविभागकथनं	५४	१८
संसृष्टिलक्षणकथनं	५५	४
स्थावरे विशेषकथनं	५५	१२
संसृष्टिविभागे ज्येष्ठविभागनिषेधः	५६	५

Digitized by Google

प्रकरणं	पृष्ठाङ्काः	पङ्क्त्यङ्काः
संसृष्टिनांमध्ये येनविद्याशौर्य्यादि नाधिकं लभ्यं तस्यभागद्वयं देयं	५६	१०
सवर्णभ्रातृणां विभागे ज्येष्ठभागकथनं	५६	१५
शूद्रस्य ज्येष्ठांशनिषेधः	५६	१७
संसृष्टासंसृष्टसोदरासोदर विभागकथनं	५८	८
भ्रातृणामभावेसोदरभ्रातृपुत्रस्याधिकारः	६०	२
पितामह्याद्यधिकारकथनं	६१	१
अथ मातामह्याद्यधिकारकथनं	६१	८
आत्मबन्ध्वादिकथनं	६२	१२
मृतोपकारार्थं दानाद्यनुमतं	६२	१७

इतिदायतत्त्वस्य सूची समाप्ता॥

Digitized by Google

॥ ॐनमः श्रीकृष्णाय ॥

प्रणम्य सच्चिदानन्दं वासुदेवं जगत्पतिं । दाय भागस्मृतेस्तत्त्वं वक्ति श्रीरघुनन्दनः ॥ निरूप्यन्तेऽत्र संक्षेपाद्दायभागविनिर्णयः। पित्रक्तविभागश्चभ्रात्र भागक्रियास्तथा॥ अनधिकारिणोभागेष्वऽविभाज्य विभाज्यता । विभक्तसंशयच्छेदोविभागोनिरुतस्य च ॥ स्त्रीधनं तद्विभागार्होऽपुत्रधनाधिकारिणः ॥

॥ अथ दायभागः ॥

तत्र नारदः । विभागोऽर्थस्य पित्र्यस्य पुत्रैर्यत्र प्रकल्प्यते॥दायभागइतिप्रोक्तं तद्विवादपदंबुधैः॥

Digitized by Google

अर्थोधनं । पित्र्यः पितृसम्बन्धाल्लब्धः । यत्र विवादपदे । दीयते इतिव्युत्पत्त्यादायशब्दः । तत्र ददातिप्रयोगोगौणः । मृतप्रव्रजितादिस्वत्वनिवृत्ति पूर्व्वकपरस्वत्वोत्पत्तिफलसाम्यात् । नतु मृतादीनां स्वत्वध्वंसफलकोन ममेदमितिसंकल्पात्मकस्त्यागस्त त्रास्ति । एवं तद्धने दायपदप्रयोगात्पूर्व्वस्वामिनः स्वत्वापगमोऽवसीयते । तत्रान्येषाञ्च पूर्व्वस्वामि सम्बन्धाधीनं स्वत्वं जायते ॥

सत्स्वङ्गजेषु तद्गामीच्छ्यर्थोभवतीति बौधायन वचनात् ॥

पितृस्वत्वोपरमे पुत्रेषु विद्यमानेषु पुत्रगतं तत्स्वत्वास्पदं धनं भवतीत्यर्थः । यत्तु मिताक्षरायां उत्पत्त्यैवार्थं स्वामित्वाल्लभेत इत्याचार्य्याः इति गौतमवचनं तदपि पितृस्वत्वोपरमेऽङ्गजत्वहेतु त्वेनोत्पत्तिमात्रसम्बन्धेनान्यसम्बन्धाधिकेन जनक धनेपुत्राणां स्वामित्वाद्धनं पुत्रोलभेत नान्य सम्बन्धो त्याचार्य्यामन्यन्ते । नचपितृस्वत्वे विद्यमानेऽपि जन्मना तद्धनेपुत्रस्वत्वमितिवाच्यं । देवलवचन विरोधात् ॥

Digitized by Google

तद्यथा। पितर्य्युपरते पुत्राः विभजेयुर्धनं पितुः। अस्वाम्यंहि भरे देषां निर्द्दोषे पितरि स्थिते। निर्द्दोषे ऽपतिते। अतएव विभागं प्रक्रम्य नारदः विनष्टेवाप्यशरणे पितर्युपरतस्पृहे। विनष्टे पतिते। अशरणे गृहस्थाश्रमरहिते। तेन मरणपातित्यगार्हस्थ्येतराश्रमगमनः स्वत्वध्वंसे उपरतस्पृहे सत्यपि स्वत्वे स्वगतधनेच्छारहिते च पुत्राणां विभागाधिकारः। अत्र पतितानामपि स्वधनसाध्यप्रायश्चित्तश्रुतेः पातित्येन स्वत्वनाशः प्रायश्चित्तवैमुख्ये बोध्यः स्वत्वसमानकालीनेच्छाप्रागभावासमानकालीनेच्छाध्वंसत्वमुपरतस्पृहत्वं। अत्रोपेक्षया स्वत्वे नाशिते पुनरिच्छया नस्वत्वमिति बोध्यं। तस्मात् देवलवचनेपितरि विद्यमाने तद्धने पुत्रानामस्वाम्यश्रुतेः उत्पत्त्यैवार्थं स्वामित्वाल्लभेतदित्याचार्य्या इति गौतमवचनं पितृस्वत्वोपरमानन्तरमेवजन्मना पुत्रस्वत्वसम्पादनात् स्वामित्वेन तद्धने पुत्रोलभेतेत्येतत्परं। नतु पितृस्वत्वकाले जन्मानन्तरं। नारद प्रथमवचने पितृपुत्रेतिसम्बन्धिमात्रोपलक्षणं। दायभागमुपक्रम्य पत्नीदुहितरश्चैव पितरौ भ्रातर

स्तथा । तत्सुतोगोत्रजोबन्धुशिष्यसब्रह्मचारिणः ॥ एषामभावे पूर्व्वस्य धनभागुत्तरोत्तरः । स्वर्य्यातस्य ह्यपुत्रस्य सर्व्ववर्णेष्वयंविधिः॥ इति याज्ञवल्क्योक्तेः। उत्तरोत्तरइतिविप्साश्रुतेः पूर्व्वस्येत्यत्रापि तथा तेन यत्रद्रव्येयत्स्वामिनः पुत्रत्वादिसम्बन्धाधीनं तत्स्वत्वोपरमे तत्सम्बन्धिनःस्वत्वं तत्र तं प्रति निरूढोदायशब्दः । पुत्रत्वादिसम्बन्धाधीनं नतु क्रयाद्यधीनं स्वत्वोपरमे नतु पतिस्वत्वसमकालीन पत्नीस्वत्वयुक्तेः। तत्र विभागस्तु सम्बन्ध्यन्तरसद्भावेन भूहिरण्यादावुत्पन्नस्य एकदेशगतस्वत्वस्य विनिगमनाभावात् विशेषव्यवहारानर्हस्य गुटिकापातादिना अमुकस्येदमितिविशेषेण भजनं स्वत्वज्ञापनमितिवदन्ति तन्न समीचीनं । यत्रास्यस्वत्वं तत्रैव गुटिकापातइतिकथं वचनाभावान्निश्चेतव्यः । यत्र वा पितुर्निधनानन्तरं तदीयाश्चयोरेकतरमादाय भ्रात्रा यदर्জ্জितं तत्रार्জ্জकस्य द्वावंशावपरस्यैकः सर्व्वसम्मतः तत्र यदि प्राचीनधनविभागे गुटिकापातादर्জ্জकेन सएवाश्वः पश्चाल्लब्धः तदाप्रादेशिकस्वत्ववादिमते प्रागर्জ্জकस्यैवसोऽश्वइति तेना

Digitized by Google

र्ज्जितधने कथं भ्रात्रन्तरस्यभागः । यदि चार्ज्जके तरेण सोऽश्वोलब्धः तदा तेनार्ज्जितधनस्य सम भागोयुक्तः। एकस्य स्वायासेन अपरस्याश्वायासेना र्ज्जितत्वात् वस्तुतस्तु पूर्व्वस्वामिस्वत्वोपरमे सम्बन्धा विशेषात् सम्बन्धिनां सर्व्वधनप्रकृतस्वत्वस्य गुटिका पातादिना प्रादेशिकस्वत्वव्यवस्थापनं विभागः । एवं कृत्स्नधनगतस्वत्वोत्पादविनाशावपि कल्प्येते संसृष्टतायां प्रादेशिकस्वत्वनाशकृत्स्नधनगतस्वत्वो त्पादाविव ॥

एतच्च विभक्तोयः पुनः पित्रा भ्रात्रावैकत्र संस्थितः । पितृव्येणाथ वा प्रीत्या सतु संसृष्ट उच्यते ॥

इति वृहस्पतिवचने येषामेव हि पितृभ्रातृ पितृव्यादीनां पितृपितामहोपार्ज्जितद्रव्येनाविभ क्तत्वमुत्पत्तितः सम्भवति तएव विभक्ताः सन्तः परस्परप्रीत्या पूर्व्वकृतविभागध्वंसेन यत्तव धनं तन्मम धनं तत्तवापि इत्येकस्मिन् कार्य्ये एकगृहि कृपतया स्थिताः संसृष्टाः । नत्वनेवं रूपाणां धन संसर्गमात्रेण संभूयकारिणां वणिजामपि संसर्गि

त्वं नापि विभक्तानां धनसंसर्गमात्रेण प्रीति पूर्व्वकाभिसन्धानं विनाऽत्यभिदधता दायभाग कृतापि स्वहस्तितं। साधारणस्वादेवहि ॥

बन्धूनामविभक्तानां भोगं नैव प्रदापयेत्। इति कात्यायनवचनं यथाश्रुतं संगच्छते द्रव्यमात्रे स्वत्वस्यापि सम्भवात् अतएवात्र चौर्य्यं न भवतीति वक्ष्यते॥

एवञ्च साक्षित्वं प्रातिभाव्यञ्च दानग्रहण मेवच। विभक्ताभ्रातरः कुर्य्युर्नाविभक्ताः परस्परं। इतिनारदवचनेनाविभक्तपरस्परदानादिनिषेधो ऽपि न्यायादेव संगच्छते। दानात्पूर्व्वमपि तद्वने प्रतिग्रहीतृस्वत्वसम्भवात् दानग्रहणयोरसम्भवः। एवं साक्षित्वप्रातिभाव्ययोर्ज्ञेयं। स्वत्वाविशेषादेवा विभक्तद्रव्येण यत्कृतं तत्र दृष्टादृष्टे कर्म्मणि सर्व्वेषां फलभागित्वं॥

तथाच नारदः। भ्रातृणामविभक्तानामेको धर्म्मः प्रवर्त्तते। विभागे सति धर्म्मोऽपि भवेत्तेषां पृथक् पृथक्। व्यासः स्थावरस्य समस्तस्य गोश्च साधारणस्यच। नैकः कुर्य्यात्क्रयं दानं परस्परमतं

Digitized by Google

विना । अत्र समस्तस्येति विशेषणेन कृत्स्नधन विषयकमेव प्रत्येकस्वत्वं प्रतीयते । तस्मात्तुल्य सम्बन्ध्यन्तरसत्वे सम्बन्धिसकाशात्संक्रान्तधनं तस्यापि ममाणीति सम्बन्धिना प्रतीयते । तदिमतौ स्वार्थं दानादिकं प्रतिषिद्धं । अतोनत्वेकदेशगत स्वत्वमिति सिद्धं । भागं विशेषयति ॥

वृहस्पतिः । पितरिरिक्थहराः पुत्राः सर्व्वएव समांशतः । विद्याधर्म्मयुतस्त्वेषामधिकं लब्धुमर्हति ॥ विद्याविज्ञानशौर्य्यार्थज्ञानदानक्रयेषु च । यस्येह प्रथिता कीर्त्तिः पितरस्तेन पुत्रिणः ॥ कालभेदेनापि विभागमाह ॥

वृहस्पतिः । एकां स्त्रीं कारयेत्कर्म्म यथांशेन गृहे गृहे । अत्र एकस्यापि एकस्यां व्यक्तौ सामयिक नानास्वत्वविनाशकल्पनं स्फुटमिति । सर्व्वेषां सामयिकनानास्वत्वसङ्कोचोवा । देशादिभेदेनापि विभागमाह कल्पतरुरत्नाकरयोः ॥

कात्यायनः । देशस्य जातेः संघस्य धर्म्मोग्रामस्य योभृगुः । उदितः स्यात् सतेनैव दायभागं प्रकल्प येत् । भगुराहेतिशेषः ॥

Digitized by Google

॥ अथ पितृकृतविभागः ॥

हारीतः जीवन्नेव वा प्रविभज्य वनमाश्रयेत् वृद्धाश्रमम्वा गच्छेत् स्वल्पेन वा संविभज्य भूयिष्ठ मादाय वसेत् यद्युपदर्शयेत् पुनस्तेभ्योगृह्णीया दिति। वृद्धाश्रमः प्रव्रज्या। अनेनस्वल्पस्य विभागो भूयिष्ठद्रव्यग्रहणञ्च पितुरभिहितं॥

विष्णुः। पिता चेत् पुत्रान् विभजेत् तस्यस्वेच्छा स्वयमुपात्तेऽर्थे पैतामहेतु पितापुत्रयोस्तुल्यं स्वामि त्वमिति। स्वार्ज्जितेऽपि स्वेच्छयान्यूनाधिकविभागो भक्तत्ववद्भरणीयत्वात्तन्मत्वादिसत्वासत्वकारणात्॥

यथा कात्यायनः। जीवद्विभागे तु पिता नैकं पुत्रं विशेषयेत्। निर्भाजयेन्न चैवैकमकस्मात्का रणं विना। उक्तकारणशून्ये तु॥

नारदः। व्याधितः कुपितश्चैव विषयासक्तचे तनः। अयथाशास्त्रकारीच न विभागे पिता प्रभुः॥ विषयासक्तत्वं सुभगापुत्रत्वादिना यत्र तु भ्रातर एव विभागमर्थयन्ते तत्र विषमभागाभावमाह॥ मनुः भ्रातृणामविभक्तानां यद्युत्थानं भवेत्सह। न तत्र भागं विषमं पिता दद्यात् कथञ्चन॥

Digitized by Google

पैतामहमन्यैर्हृतं पित्रोतं द्रुतदकामतोन विभज नीयं॥

यथा मनुविष्णू। पैतृकन्तु पिता द्रव्यमनवाप्तं यदाप्नुयात्। न तत्पुत्रैर्भजेत्सार्द्धमकामः स्वयम र्ज्जितं। तत् स्वयमर्ज्जितमिति कृत्वा न विभजेदित्य न्वयः अन्योद्धारे तु वक्ष्यमाणशङ्खवचनाद्व्यवस्था सामान्यविशेषन्यायात्। एतत्तु स्थावरविषयं। मण्यादावनुद्धृतेतु पितुरेव स्वाच्छ्रुत्यं॥

यथा याज्ञवल्क्यः। मणिमुक्ताप्रवालानां सर्व्व स्यैव पिता प्रभुः। स्थावरस्य तु सर्व्वस्य न पिता न पितामहः। पितामहश्रुतेस्तद्धनविषयमिदं। एवञ्च पूर्व्वनष्टाच्च योभूमिमेकश्चेदुद्धरेच्छ्रमात्। यथा भागं भजन्त्यन्ये दत्वांशन्तुतुरीयकमितिशङ्खवचनं भ्रात्राद्युद्धृतविषयं। अत्र स्वयं तुरीयांशं गृहीत्वा भ्रात्रादिभिः सहोद्धर्त्ता गृह्णीयात् अन्यथा विषम दृष्टंस्यात्। पितुर्भागकरणे त्वपुत्रपत्न्यै पुत्रतुल्यांश दानमाह॥

Digitized by Google

व्यासः। अपुत्राश्च पितुःपत्न्यः समानांशाः प्रकीर्त्तिताः। पितामह्याश्च सर्व्वास्तामातृतुल्याः प्रकीर्त्तिताः। एतच्चादत्ते स्त्रीधने ॥

यथा याज्ञवल्क्यः। यदिकुर्य्यात् समानांशान् पत्न्यः कार्य्याः समांशिकाः। नदत्तं स्त्रीधनं यासां भर्त्रावा श्वशुरेणवा। एतद्वचनैकवाक्यतया व्यास वचने पितुः पत्न्यइतिनान्वयः। न च वैपरीत्यं स्पष्टस्य तु विधेर्नान्यैरुपसंहारइष्यतइतिन्यायात्। तेन पुत्रकृतविभागे विमातुर्नांशिता स्त्रीधने दत्तेत्वर्द्धं पुत्रांशस्य पत्या देयं ॥

अधिविन्नस्त्रियै देयमाधिवेदनिकं समं। नदत्तं स्त्रीधनं यस्यै दत्ते त्वर्द्धं प्रकीर्त्तितमिति विवादे याज्ञवल्क्यदर्शनेन वहूनामेकधर्म्माणामेकस्यापि यदुच्यते। सर्व्वेषामेवतत्कुर्य्यादेकरूपाहि तेस्मृताः ॥ इतिबौधायनोक्तेन तथा प्रतीतेः पितामह्यधनस्य पौत्रैर्विभागे पितामह्यौ मातृवद्भागोदेयइति पैतामहेतु पितापुत्रयोस्तुल्यं स्वामित्वमिति विष्णूक्तं ॥

भूर्य्या पितामहोपात्ता निबन्धोद्रव्यमेव वा। तच्च स्यात् सदृशं स्वाम्यं पितुः पुत्रस्य चोभयोः। इति

Digitized by Google

याज्ञवल्क्योक्तञ्च । निबन्धआकरादौ राजादि दत्तं नियतलभ्यमितिकल्पतरूक्तं द्रष्टव्यं । द्रव्यं द्विपदरूपं भूसाद्दचर्य्यात् ॥

तथाच स्थावरं द्विपदञ्चैव यद्यपि स्वयमर्ज्जितं। असम्भूय सुतान् सर्व्वान्नदानं नच विक्रयः॥ इत्येतेषु निबन्धभूमिद्विपदेषु पितामह्योपात्तेषु पितुर्यथापार्व्वणपिण्डदाढ्यत्वेन तत्पिण्डधने स्वत्वंतथा तन्मरणादिना तत् स्वत्वोपरमे तत्पुत्राणां पिण्ड योग्यांशे सत्यपि पिण्डव्येंऽशिता । अतएव व्यक्त माह रत्नाकरधृतकात्यायनः। अविभक्तेमृते पुत्रे तत्सुतंरिक्थभागिनं । कुर्व्वीत जीवनं येन लब्धं नैव पितामहात्॥ लभेतांशं स्वपित्र्यञ्च पिण्डव्याप्तस्य वा सुतात् । सति तु पितरि पार्व्वणानधिकारात्य त्राणां नांशिता। एवं धनिनः पौत्रस्वत्वोपरमे तदंश भाजे प्रपौत्राणामंशिता । सति पौत्रेतु नांशिता इतियद्वा पुत्रेभ्यः स्वधनविभागदाने स्वाच्छन्द्यात् यथा न्यूनाधिकदानं तथात्र नास्तीत्येतत्परं नतु पितापुत्रयोस्तुल्यांशित्वं ॥

Digitized by Google

द्वावंशौ प्रतिपद्येत विभजन्नात्मनःपिता। समांशहारिणी माता पुत्राणां स्यान्मृते पतौ। इतिनारदवचने पितुर्ज्ञीप्सितत्वात्। नचैतत्स्वार्जितपिढद्रव्यपरं। तस्य स्वेच्छास्वयमुपात्तेऽर्थे इतिविष्णूक्तस्वेच्छायाउद्दामरूपायाज्ञांशनिर्नयानर्हत्वात् भूयिष्ठमादाय वसेदित्यनेन विरोधात् किन्तु नारदवचनं द्वावंशाविति पितामहादिधनपरं॥

पितुःप्रशादाङ्गुज्यन्ते वस्त्राण्याभरणानिच स्थावरन्तु नभुज्येत प्रशादे सति पैढके। इति मिताक्षराधृतवचनमपि पितामहधनपरं। पित्रा च स्वोपार्ज्जितं स्थावरं दत्तं भुज्यतएवेति अन्यथा मूलभूतश्रुत्यन्तरकल्पनापत्तेः निवृत्तरजस्कायामेवमातरि पितामहधनविभागमाह॥

बृहस्पतिः। पित्रोरभावे भ्रातॄणां विभागः सम्प्रदर्शितः। मातुर्निवृत्ते रजसि जीवतोरपि श्रूयते॥ अत्र मातृपदं विमातृपरमपि पुत्रान्तरोत्पत्तिसम्भावनातौल्यात्। मातुर्निवृत्ते रजसीति श्रुतेरेतद्वचनं पितामहधनपरं मतु पितृधनपरं तत्र विभक्तजस्य भागदर्शनात॥

Digitized by Google

यथाह बृहस्पतिः। पित्रा सह विभक्तायै सापत्ना वा सहोदराः। जघन्यजास्च ये तेषां पितृभागहरा स्मृते॥ अनीशः पूर्व्वजः पित्रे भ्रातृभागे विभक्तजः। विभक्तजोविभागानन्तरं गर्भाधानेन जातः। यथा धने तथर्णेऽपि दानाधानक्रयेषुच। परस्परमनीशास्ते मृक्ता शौचोदकक्रियाः॥

याज्ञवल्क्यः। विभागश्चेत् पिता कुर्य्यादिच्छया विभजेत्सुतान्। ज्येष्ठंवा श्रेष्ठभागेन सर्व्वे वासुः समांशिनः॥ अत्रेच्छयेति स्वोपात्तविषयं श्रेष्ठभागेन विंशोद्धारयुक्तभागेन श्रेष्ठसमभागौ पैतामह धनविषयौ प्रागुक्तवचनसामञ्जस्यात्॥

एवं चोर्द्धं पितुः पुत्रारिक्थं विभजेयुर्निवृत्ते रजसि मातुर्जीवतिचेच्छति इतिगौतमवचनस्य मातृरजसोनिवृत्त्युक्तेः पैतामहधनगोचरत्वं तत स्चोर्द्धं पितुरिति पितुर्मरणप्रतीतेर्जीवतिचेच्छतीत्यत्रापि पितुरेवेच्छाप्रतीयते। तेन पितामहधने पितुरिच्छया विभागोन पुत्रस्येति सिद्धं॥ एवञ्च अस्वाम्यं हि भवेदेषां निर्द्दोषे पितरि स्थिते। इति देवलवचनं पितुरनुमत्या विभागविषयकमिति

Digitized by Google

बौधायनवचनञ्च पितृधनवत् पैतामहधनपरमप्यविशेषात्। यदितु निवृत्तरजस्कायां मातर्य्यपि दैवात् पितामहधनं विभक्तं ॥

तत्र विष्णुः। पितृविभक्ताविभागानन्तरोत्पन्नस्य विभागं दद्युरिति ॥ नेदं पितृधनपरं। प्रागुक्त बृहस्पतिवचनविरोधात् द्वादशविधान् पुत्रानुद्दिश्यदेवलः ॥

सर्व्वे ह्यनौरसस्यैते पुत्रादायहराः स्मृताः। औरसे पुनरुत्पन्ने तेषु ज्यैष्ठं न विद्यते॥ तेषां सवर्णा ये पुत्रास्तेतृतीयांशभागिनः। हीनास्तमुपजीवेयुर्ग्रासाच्छादनसंवृताः। दायहराः पूर्णांशहराः। तेषामौरसव्यतिरिक्तानां मध्ये ये पितुः सवर्णास्ते सत्यौरसे तृतीयांशहराः॥

अत्रापि विशेषमाह मनुः। औरसश्चेत्रजो पुत्रौ पितृरिक्थस्य भागिनौ। दशापरेच क्रमशोगोत्ररिक्थांशभागिनः। सन्ततिकारकत्वेन धनिदेयपिण्ड दातृत्वेनच प्रथमं पुत्रिकापुत्रस्य तदनन्तरं दत्तकस्य गोत्ररिक्थयोर्भागित्वं। क्रमशः पूर्व्वपूर्व्वाभावे परःपरः इत्थं क्रमेण गोत्रधनयोर्भागिनः॥ शूद्रस्य दासीपुत्रविभागमाह॥

Digitized by Google

याज्ञवल्क्यः जातोऽपिदास्यां शूद्रेण कामतोंऽशहरोभवेत्। मृते पितरि कुर्य्युस्तं भ्रातरस्त्वर्द्धभागिनं। अभ्रातृकोहरेत्सर्व्वं दुहितॄणांसुताऋते। कामतःपितु रिच्छातः। अंशहरः पुत्रान्तरतुल्यांशहरः। सतितु दौहित्रे तस्यैव स्त्रीयसन्तानत्वात्। दासीपुत्रस्यापरिणीताजातत्वात्। तयोस्तुल्यांशित्वं युक्तमिति। अनियोगोत्पन्नक्षेत्रजस्यौरसेन सह विभागमाह मनुः। यद्येकक्षत्थिनौ स्यातामौरस क्षेत्रजौ सुतौ। यद्यस्य पैतृकं रिक्थं सतद्गृह्णीत नेतरः। एकक्षत्थिनौ एकस्यां जातौ क्षत्थिनौ। यस्य बीजाद्योजातः स तस्य क्षत्थं गृह्णीयात्। इतरोऽन्यबीजजोन गृह्णीयादित्यर्थः। स्त्रीधने यत्पितृदत्तं यद्धनं स्त्रीये तद्बीजजस्तद्धनं गृह्णीयात् नान्यदित्याह नारदः। द्वौ सुतौ विवदेयातां द्वाभ्यां जातौ स्त्रियाधने। तयोर्यद्यस्य पित्र्यं स्यात् सतद्ग्रहीत नेतरः॥

॥ अथोपरते पितरि भ्रातॄणां विभागः ॥

तत्रदेवलः। पितर्य्युपरतेपुत्राविभजेयुर्द्धनंपितुः। पितुः शकाशादागतधनमित्यर्थः॥

Digitized by Google

नारदः । यच्छिष्टं पितृदायेभ्यो दत्वर्णं पैतृकं ततः । भ्रातृभिस्तद्विभक्तव्यमृणी नस्याद्यथा पिता । पितृदायेभ्यः पित्राद्यत्तप्रतिश्रुतेभ्यः । ऋणी न स्यादित्यनेनाशक्तौ शोधनीयमित्युत्तमर्णस्थाने स्वीकर्त्तव्यं । अत्र मातरि जीवन्त्यां सोदराणां विभागो न धर्म्यः ॥

यथा शङ्खलिखितौ । ऋक्थमूलं हि कुटुम्बमस्तन्त्राः पितृमन्तोमातुरप्येवमस्थितायाः इति ॥

अतएव व्यासः । भ्रातॄणां जीवतोः पित्रोः सह वासोविधीयते । तदभावे विभक्तानां धर्म्मस्तेषां विवर्द्धते ॥ विभक्तानां स्वमात्रधने वैदिककर्म्म करणात्तन्मात्रधर्म्मत्वेन तद्वृद्धिरित्यर्थः । यदि तु विभज्यते तदामातुर्भागमाह ॥

कात्यायनः । मातापि पितरि प्रेते पुत्रतुल्यांशहारिणी । समांशता तु मातुरप्राप्तस्त्रीधनायाः । प्राप्तस्त्रीधनायास्तु भागार्द्धं प्रागुक्तवचनात् । सोद्धारानुद्धाराभ्यां द्विप्रकारविभागमाह ॥

बृहस्पतिः । द्विप्रकारोविभागस्तु दायादानां प्रकीर्त्तितः । वयोज्येष्ठक्रमेणैकः समापरांशकल्पना ॥

Digitized by Google

वयोज्येष्ठक्रमेणेत्युद्धाराभिप्रायेण। शूद्रे तद्द्वाराभावो वक्ष्यते। समभागस्य शास्त्रीयत्वेऽप्युद्धारपक्षोभक्त्यति शयादविरुद्धः। विभागाविभागविकल्पवत्॥

यथा मनुः। ज्येष्ठएव तु गृह्णीयात् पित्र्यं धनमशेषतः। शेषास्तमुपजीवेयुर्यथैव पितरं तथा॥

नारदः। विभृयाद्वेच्छतः सर्व्वान् ज्येष्ठोभ्राता यथा पिता। भ्राता शक्तः कनिष्ठोवा शक्त्यपेक्षा कुले स्थितिः॥ मध्यमोऽत्र दण्डापूपन्यायात्सिद्धः। सच न्यायोयथा मूषिकस्य दण्डभक्षणं दुष्करं तन्नि ष्पत्तौ तत्सदृचरितापूपभक्षणमितिसुकरत्वात् यथा सम्भाव्यते तथात्रापि सदृचरितैकसिद्धावपरसिद्धे रौचित्यात् तत्सम्भाव्यते॥

अतएवाविशेषान्नारदः। कुटुम्बार्थेषु चोद्युक्त स्तत्कार्य्यं कुरुते तु यः। सभ्रातृभिर्वृद्धणीयोग्रासा च्छादनवाहनैः॥

एवम्भूतं प्रशंसति व्यासः। जीविते यस्य जीवन्ति विप्रामित्राणि बान्धवाः। सफलं जीवितं तस्य आत्मार्थे कोन जीवति। हरिवंशे वैपरीत्यादोष माह इन्द्रं प्रति नारदः। अन्योन्यभेदोभ्रातॄणां

Digitized by Google

सुहृदां वा बलान्तक। भवत्यानन्दकृदेव द्विषतां नात्र संशयः। अत्र सर्व्वेच्छया नारदेन सहवास उक्तः। विभागस्तु न तथा॥

यथा विभागं प्रक्रम्य कात्यायनः। अप्राप्तव्यवहाराणां धनं व्ययविवर्ज्जितं। न्यसेयुर्व्बन्धुमित्रेषु प्रेषितानां तथैवच। अप्राप्तव्यवहाराणां बालानां यस्तु स्वयोग्यतया पित्रादिधने निस्पृहः स तण्डुलप्रस्थादि दत्वा तत्पुत्रादेर्दुरन्तनिरासाय विभजनीयः॥

यथामनुः। भ्रातॄणां यस्तु नेहेत धनं शक्तः स्वकर्म्मणा। स निर्भाज्यः स्वकादंशात्किञ्चिदुद्धृत्योपजीवनं॥

कात्यायनः। दृश्यमानं विभज्येत गृहक्षेत्रचतुष्पदं। गूढद्रव्याभिशङ्कायां प्रत्ययस्तत्र कीर्त्तितः॥ प्रत्ययोदिव्यं। एतदेव स्पष्टयति॥

गृहोपस्करवाह्यास्तु दोह्याभरणकर्म्मणः। दृश्यमानाविभज्यन्ते कोषं गूढेऽब्रवीद्भृगुः॥ गृहोपस्करः। उदूखलादि कर्म्मणोदासादयः कोषोदिव्यविशेषः। स तु दिव्यतत्त्वेऽनुसन्धेयः। प्रसिद्धमन्यत्॥

Digitized by Google

नारदः। येषान्तु न कृताः पित्रा संस्कारविधयः क्रमात्। कर्त्तव्याभ्रातृभिस्तेषां पैतृकादेव तद्धनात्। अविद्यमाने पित्र्यर्थे स्वांशादुद्धृत्य वा पुनः। अवश्यकार्य्याः संस्काराः भ्रातृभिः पूर्व्वसंस्कृतैः॥ कन्याभ्यस्तु विवाहोचितद्रव्यदानमाह॥

देवलः। कन्याभ्यश्च पितृद्रव्याद्देयं वैवाहिकं वसु। अपुत्रकस्य कन्या सा धर्म्मजा पुत्रवद्वरेत्॥

विष्णुः। अनूढानान्तु कन्यानां स्ववृत्तानुसारेण संस्कारं कुर्य्यात्। एवं तुरीयांशदानप्रतिपादकमपि विवाहोचितद्रव्यदानपरं। पितृव्यातिरिक्तानामपि संस्कर्तृत्वमाह दैतनिर्णयामृतधृतस्मृतिः। अष्टौ संस्कारकर्म्माणि गर्भाधानमिव स्वयं। पिता कुर्य्यात्तदन्यो वा तस्याभावे तु तत्क्रमात्॥

॥ अथ विभागानधिकारिणः॥

आपस्तम्बः। सर्व्वे हि धर्म्मयुक्ताभागिनोद्रव्यमर्हन्ति। यस्वधर्म्मेण द्रव्याणि प्रतिपादयति ज्येष्ठोपि तमभागं कुर्व्वीतेति ज्येष्ठोऽपि पुत्रवदतिशेषः॥

Digitized by Google

तथाच वृहस्पतिः । सवर्णाजोप्यगुणवान् नार्ह्यः स्यात् पैतृके धने । तत्पिण्डदाः श्रोत्रियाये तेषान्न दभिधीयते ॥ तत्पिण्डदाः धनिपिण्डदाः अतएव श्रोत्रियादित्युक्तं अगुणवान् गुणविरुद्धदोषवान् अगुणवद्ग्रासाच्छादनदातारइति रत्नाकरः एतन्मतेऽपि सुतरां धनिपिण्डदात्वं प्रतीयते ॥

यथाजलं कुम्भेन तरन्मज्जति मानवः । तथा पिता कुपुत्रेण तमस्यन्धे निमज्जति ॥

कात्यायनः । यज्ञार्थं द्रव्यमुत्पन्नं तस्मात् द्रव्यं नियोजयेत् । स्थानेषु द्रव्ययोग्येषु न स्त्रीमूर्ख विधर्म्मिषु ॥ स्त्रीति पत्न्यादिविशेषविहितेतरसपिण्ड स्त्रीपरं तथा शास्त्रशौर्य्यादिरहितस्तपोदानविवर्ज्जितः । आचारहीनः पुत्रस्तु मूत्रोच्चारसमस्तुसः ॥

शङ्खः । अकृत्वा प्रेतकार्य्याणि प्रेतस्य धनहारकः । वर्णानां यदधे प्रोक्तं तद्धृतं नियतश्चरेत् ॥

देवलः । मृते पितरि न क्लीवकुष्ठ्युन्मत्तजडान्धकाः । पतितः पतितापत्यं लिङ्गी दायांशभागिनः ॥ तेषां पतितवर्ज्जेभ्योभक्तवस्त्रं प्रदीयते । तत्सुताः पितृदायांशं लभेरन् दोषवर्ज्जिताः । जडोधर्म्म

क्लत्वे निरुक्ताद्दः अन्धोजन्मान्धः जात्यन्धवधिरौ नथेति मनुवचनात् लिङ्गी कपटव्रतधारी ॥

नारदः । पितृद्विट्पतितः पण्डोयश्च स्यादौपपातिकः । औरसाअपिनै तेऽंशं लभेरन् क्लेचजाः कुनः । पितृद्विट् पितरि जीवति तत्ताडनादिकृत् मृते तु तत्श्राद्धादिविमुखः । औपपातिकः उपपातकैः संदृष्टः कल्पतरुकृता तु औपपातिकदित्यत्र पपात्रितइति पठित्वा राजवधादिदोषेण बान्धवै र्यस्य घटापवर्ज्जनं कृतमितिविवृतं । प्रकाशकारेण उपपातकीतिपठित्वा उपपातकैर्यक्तइति विवृतं ॥

॥ अथ विभाज्याविभज्ये ॥

तत्र व्यासः । अनाश्रित्य पितृद्रव्यं स्वशक्त्याप्नोति यद्धनं । दायादेभ्योन तद्दद्यात् विद्यालब्धञ्च यद्भवेत् ॥

विद्याधनमाह कात्यायनः । उपन्यस्ते तु यल्लब्धं विद्ययापणपूर्व्वकं । विद्याधनन्तुतद्विद्यात् विभागे न नियोजयेत् ॥ शिष्यादार्त्विज्यतः प्रश्नात्सन्दिग्ध प्रश्न निर्णयात् । स्वज्ञानसंभनाद्दाल्लब्धं प्राध्ययनात्तु

Digitized by Google

यत्। विद्याधनन्तु तत्राऊर्ब्विभागे न प्रयोजयेत्। शिल्पेष्वपि हि धर्म्मोऽयंमूल्याद्यच्चाधिकं भवेत्॥ परं निरस्य यल्लब्धं विद्यया द्यूतपूर्व्वकं। विद्याधनन्तु तद्विद्यात् न विभाज्यं बृहस्पतिः॥ यदि भवान् भङ्गमुपन्यस्यति तदा भवतएव मयैतद्देयमिति पणितं यच्चोपन्यासं निस्तीर्य्य लभते तन्न विभाज्यं शिष्याद्ध्यापितात् आर्त्विज्यतः यजमानाद्दक्षिणया लब्धधनं न प्रतिग्रहलब्धं वेतनरूपत्वात्तस्य तथा यत्किञ्चिद्विद्याप्रश्ने निस्तीर्णेऽपणितं यदि कश्चित् परितोषाद्दाति तथा योह्यस्मिन् शास्त्रार्थे अस्माकं संशयमपनयति तस्मै धनमिदं ददानीत्युपस्थितस्य संशयमपनीय यल्लब्धं वादिनोर्व्वा सन्देहे न्यायकरणार्थमागतयोः सम्यङ्निरूपणेन यल्लब्धं षष्ठांशादिकं तथा शास्त्रादिप्रकृष्टज्ञानं सम्भाव्य यत् प्रतिग्रहादिना लब्धं तथा शास्त्रज्ञानविवादे अन्यत्रापि यत्र कुत्रचिदन्योन्यज्ञानविवादे निर्ज्जित्य यल्लब्धं। तथैकस्मिन् देये बहूनामुपस्थिते येन प्रकृष्टात् यल्लब्धं। तथा शिल्पादिविद्यया चित्रकारसुवर्णकारादिभिर्यल्लब्धं। तथाद्यूतेनापि परं निर्ज्जित्य

Digitized by Google

यल्लब्धं तत्सर्व्वमविभाज्यमितरैः तस्माद्यया कयाचिद्विद्यया लब्धमर्जकस्यैव तन्नेतरेषामिति। प्रदर्शनार्थन्तु कात्यायनेन विस्तारितमिति दायभागः॥

नारदः। कुटुम्बं बिभृयाद्भ्रातुर्यो विद्यामधिगच्छतः। भागं विद्याधनात्तस्मात्सलभेताश्रुतोऽपि सन्॥ बिभृयादित्येकववननिर्देशान्न बहवः यदि विद्यामभ्यस्यतोभ्रातुः कुटुम्बमपरोभ्राता स्वधनव्ययशरीरायासाभ्यां सम्बर्द्धयति तदा तद्विद्यार्ज्जितधने तस्याधिकारः। अश्रुतोमूर्खः॥ कल्पतरुमिताक्षरादीपकलिकासु॥

कात्यायनः। परभक्तोपयोगेन विद्या प्राप्तान्य तस्तु या। तया लब्धं धनं यत्तु विद्यालब्धं तदुच्यते॥ अन्यतः पितृमातृकुलव्यतिरिक्तात्। अत्र विशेषयति सएव नाविद्यानान्तु वैद्येन देयं विद्याधनात्क्वचित्। समविद्याधिकानान्तु देयं वैद्येन तद्धनं॥ तत्रोच्चरितविद्यापदमुभाभ्यां सम्बध्यते तेन समविद्याधिकविद्यानां भागोन तु न्यूनविद्याविद्ययोः वैद्येन विदुषा पुनर्विशेषयति॥ कुले विनीतविद्यानां भ्रातृणां पितृतोऽपि वा शौर्य्यप्राप्तन्तु यद्वित्तं

विभाज्यं तद्बृहस्पतिः । कुले स्वकुले पितामहपितृव्यादिभ्यः पितृतएव वा शिक्षितविद्यानां भ्रातॄणां यद्विद्याशौर्य्यप्राप्तं धनं तद्विभजनीयमिति कल्पतरु रत्नाकरौ ॥

पुनः कात्यायनः । ह्यंशहरोऽर्द्धहरोवा पुत्र वित्तार्ज्जनात्पिता । पुत्रवित्तार्ज्जनात् । क्षुद्रभिक्षेतोभावोद्रव्यवत् प्रकाशतइति न्यायात् पुत्रार्ज्जित वित्तात् पितुर्ह्यंशित्वं पितृधनानुपघातविषयं भ्रातृधनोपघातविषयंच्च । अर्जकस्य तु ह्यंशित्वं भ्रातृधनोपघाते तु तेषामप्येकांशित्वं वक्ष्यमाण व्यासवचनात् पितुरर्द्धहरत्वन्तु पितृद्रव्योपघाता दगुणवत्त्वादेति दायभागः । अनुपघाते पिता ह्यंश हरः अर्जकत्वात् । स्वयमपि ह्यंशहरः इतरेषाम नंशित्वं भ्रातृद्रव्योपघाते तु तस्याप्येकांशइति ह्यंशार्द्धांशयोर्भेदकथनं ॥

पुनः कात्यायनः । गोप्रचारस्य रथ्या च वस्त्रं यच्चाङ्गयोजितं । प्रायोज्यं न विभज्येत शिल्पार्थन्तु बृहस्पतिः प्रायोज्यं यद्यस्य प्रयोजनार्हं पुस्तकादि नतन्मूर्खादिभिः सह पण्डितादिभिर्विभजनीयं एव मेव दायभागमदनपारिजातादयः ॥

Digitized by Google

याज्ञवल्क्यः । पितृभ्याञ्चैव यद्दत्तं तत्तस्यैव धनं भवेत् । पुत्रदुहित्रोर्यदलङ्कारादि दत्तं तत्तस्यैवेति मूलपान्यूपाध्यायाः ॥

नारदः । शौर्य्यभार्य्याधने चोभे यच्चविद्याधनञ्च यत् । चीन्येतान्यविभाज्यानि प्रसादो यश्चपैतृकः ॥ प्राप्तञ्च सदृभार्य्ययेति भरद्वाजवचनात् भार्य्याप्राप्तिकाले लब्धं धनं भार्य्याधनमौद्वाहिकमित्यर्थः चोभे इत्यत्र द्वित्वेति पाठे एतत्त्रिकं हित्वान्यदिभजेदित्यनुवर्त्तते अतएतान्यविभाज्यानीति । प्रसाददत्तस्य पौर्व्वापर्य्ये पूर्व्वसंप्रदानस्यैव तद्वत्यं ॥

सर्व्वेष्वेव विवादेषु बलवत्युत्तरा क्रिया । आधौ प्रतिग्रहे क्रीते पूर्व्वातु बलवत्तरेति याज्ञवल्क्यवचनात् । अत्र या बलवती सैव सिद्ध्यतीत्यर्थः तत्राप्याधिक्रिया स्वामिनोयथेष्टविनियोगविरोधिका नतु स्वत्वध्वंसजनिकेति सा पूर्व्वापरा वा प्रतिग्रहरूपक्रियाभ्यां पूर्व्वस्वामिस्वत्वध्वंसोत्तरजाताभ्यां बलवतीभ्यां साध्यते अतएव रत्नाकरादिधृतस्मृतिः ॥ न्यासं कृत्वापरञ्चाधिं कृत्वा वाधिं करोति यः विक्रयम्वा क्रिया तत्र पश्चिमा बलवत्तरा । न्यासं कृत्वा

Digitized by Google

धिं करोति आधिं कृत्वा वा विक्रयं करोति विक्रय पदं स्वत्वध्वंसकत्वात् दानं लक्षयति तच्च पराक्रिया सिद्धेत्यर्थः। एवञ्च विक्रेतृदात्रोर्मरणादिना आध्य नुद्धारे विक्रयदानाभ्यां तत्कर्तृतुल्यस्वत्वजनना त्तत्र तत्क्रेतृप्रतिगृहीतृभ्यामाधुद्धारः कार्य्यइति तत्रैवागमविवादे ताभ्यान्तयोर्भोगएव व्यवस्था पनीयेनागमादेरिति ॥

शङ्खलिखितौ नवास्तुविभागेनोदकपात्रा लङ्कारोपयुक्तस्त्रीवाससामपां प्रचाररथ्यानां विभा गश्चेति प्रजापतिरिति यस्मिन् वास्तुनि येन गृहो द्यानादिकं कृतमपरेणापि स्थानान्तरे तथाकृत श्चेत्तदा येन यत्कृतं तत्तस्यैव अन्यत्राप्येवं साधा रणधनार्ज्जितेऽपि विशेषमाह ॥

व्यासः। साधारणं समाश्रित्य यत्किञ्चिद्दाहना युधं। शौर्य्यादिनाप्नोति धनं भ्रातरस्तत्र भागिनः॥ तस्य भागद्वयं देयं शेषास्तु समभागिनः। अत्र भ्रातरइत्युपलक्षणं पितृव्यादयोपि बोद्धव्याः तस्या र्ज्जकस्य साधारणोपघाते यस्य यावतोऽंशस्याल्पस्य महतोवोपघातस्तस्य तदनुसारेण भागकल्पना

Digitized by Google

कार्य्येतिदायभागः । नच स्थावरस्य समस्तस्य गोत्रसाधारणस्यच । नैकःकुर्य्यात्क्रयं दानं परस्पर मतं विना॥विभक्ताश्चविभक्तावा सपिण्डाःस्थावरे समाः । एकोह्यनीशः सर्व्वत्र दानाबमनविक्रये॥ इतिव्यासवचनाभ्यामेकस्य दानबन्धकविक्रयाधि कारइतिवाच्यं । यथेष्टविनियोगार्हत्वरूपस्य स्वत्वस्य द्रव्यान्तरइवात्राप्यविशेषात् वचनञ्च स्वामित्वेन दुर्व्वृत्तपुरुषगोचरविक्रयादिना कुटुम्ब विरोधादधर्म्मज्ञापनार्थं निषेधरूपं न तु विक्रयाद्य निस्त्यर्थमितिदायभागः विभक्तानामपि यत्रांश विच्छेदेन जातस्तन्मध्यगतएवावतिष्ठते तेन तत्र साधारणत्वमेव तत्रैकोऽनीशः पृथग्भूतेषु स्वतन्त्र कृतस्य सिद्धिरेवेति विवादचिन्तामणिः । वस्तु तस्तु विभक्तेष्वनुज्ञाग्रहणं विभक्ताविभक्तसीमादिसंश यव्युदासायग्रामसामन्ताद्यनुमतिग्रहणवत्तदुक्तं मिताक्षरायां। स्वग्रामज्ञातिसामन्तदायादानुमते नच।हिरण्योदकदानेन षड्भिर्गच्छति मेदिनीति॥ दायादा दौहित्रादयः । ज्ञातेः पृथगुपादानात् हिरण्योदकदानेनेति।स्थावरे विक्रयोनास्ति कुर्य्या

Digitized by Google

दाधिमनुज्ञयाइति स्थावरस्य केवलविक्रयप्रतिषेधात् एवं भूमिं यः प्रतिगृह्णाति यश्च भूमिं प्रयच्छति। तावुभौ पुण्यकर्म्माणौ नियतं स्वर्गगामिनौ ॥ इति दानप्रशंसादर्शनाच्च विक्रयेपि कर्त्तव्ये सहिरण्यमुदकं दत्वा दानरूपेण स्थावरविक्रयइति विज्ञानेश्वरः वस्तुतस्तु स्थावरविक्रयनिषेधोऽविभक्तस्थावरविषयः। तच्चापियदि विक्रयं विनाऽवस्थितिर्नभवति तदा विक्रये कर्त्तव्ये दायादानां दुरन्ततानिवृत्त्यर्थं क्रेतुरिच्छयादानमप्युक्तं अतएवचारीतेन यच्चोपकारिणे ददाति इति यत् दानोपसर्गत्वमुक्तं तच्छ्रुतोपकारिपरं तदितरोपकारिणे दाने फलमाह दत्तः मातापित्रोर्गुरौ मित्रे विनीते चोपकारिणे। दीतानाथविशिष्टेभ्योदत्तन्तुसफलं भवेत् ॥

अतएव नारदः। स्वभागान् यदि ते दद्युर्विक्रीणीयुरथापिवा। कुर्य्युर्यदिष्टं तत्सर्व्वमीशास्तेस्वधनस्यवै ॥

अतएव याज्ञवल्क्यः। क्रमादभ्यागतंद्रव्यं दत्तमभ्युद्धरेत्तु यः। दायादेभ्योन तद्दद्यात् विद्यया

लब्धमेवच । पितृपितामहागतं बलाद्न्यैर्हृतं योऽंश्यन्तरानामनुज्ञयाऽद्धरति तदंश्यन्तरेभ्योन दद्यात्। भूमौ तु विशेषयति ॥

शङ्खः। पूर्व्वनष्टाच्च योभूमिमेकएवोद्धरेत्क्रमात्। यथाभागं भजन्त्यन्ये दत्त्वांशन्तुतुरीयकं॥ एतद्वचनं स्मृतिमहार्णवकामधेनुपारिजातप्रभृतिष्वलिखनाद् युक्तमेवेतिरत्नाकरः। नन्न दायभागमिताक्षरा प्रभृतिधृतत्वात् पूर्व्वपुरुषार्ज्जितनष्टोद्धारे विशेष यति मिताक्षरायां ॥

स्थावरं द्विपदञ्चैव यद्यपि स्वयमर्ज्जितं। अस मूय सुतान् सर्व्वान्नदानं नच विक्रयः॥ ये जाताये ऽप्यजातावा ये च गर्भेव्यवस्थिताः। वृत्तिन्तेपिहि काङ्क्षन्ति वृत्तिलोपोविगर्हितः ॥ अस्याप्यपवाद माह ॥

एकोपिस्थावरे कुर्य्याद्दानाधमनविक्रयं। आपत्काले कुटुम्बार्थे धर्म्मार्थे च विशेषतः॥ आध मनं बन्धकत्वेन स्थातं। कुटुम्बार्थेदासकृतस्यापि सिद्धिमाह॥

Digitized by Google

मनुः । कुटुम्बार्थेऽध्यधीनोपि व्यवहारं यमाचरेत् । स्वदेशे वा विदेशे वा तं ज्यायान्न विचालयेत् ॥ तद्देशस्थे देशान्तरस्थेवा स्वामिनि कुटुम्बव्यवहारनिमित्तं दासोपि यद्दणादिकं कुर्य्यात् तत्स्वाम्यनुमन्येतेति कुल्लूकभट्टः ॥

व्यक्तमाह बृहस्पतिः । पितव्यभ्रातृपुत्रस्त्री दासशिष्यानुजीविभिः । यद्गृहीतं कुटुम्बार्थे तद्गृही दातु मर्हति ॥

मनुः । गृहीता यदिनष्टः स्यात्कुटुम्बार्थे कृत व्ययः दातव्यं बान्धवैस्तत्स्यात् प्रविभक्तैरपिस्वतः स्वतःस्वधनात् ॥

कात्यायनः । कुटुम्बार्थमशक्तेतु गृहीतं व्याधितेऽथवा । उपप्लवनिमित्तन्तु विद्यादापत्कृतन्तु तत् ॥ कन्यावैवाहिकञ्चैव प्रेतकार्य्येच यत्कृतं । एतत्सर्व्वं प्रदातव्यं कुटुम्बेन कृतं प्रभोः । कुटुम्बमवश्यं भरणीयं । प्रभोरिति कर्त्तरि षष्ठी तेन प्रभुना दातव्यमिति रत्नाकरः ॥

दायभागे दारीतः जीवति पितरि पुत्राणामर्थादानविसर्गात्त्वेषु न स्वातन्त्र्यं कामं दीने प्रोषिते आर्त्तिं गतेवा ज्येष्ठोऽर्थांश्चिन्तयेत् ॥

Digitized by Google

सुव्यक्तमाहतुः शङ्खलिखितौ । पितर्यशक्ते कुटुम्बव्यवहारान् ज्येष्ठः प्रतिकुर्य्यादनन्तरोवा कार्य्यञ्चैतदनुमतेानत्वकामे पितरि ऋक्थविभागो वृद्धेविपरीतचेतसि दीर्घरोगिनि वा ज्येष्ठएव पितृवदर्थान्पालयेत् इतरेषान्तूक्थमूलं हि कुटुम्बमस्वतन्त्राः पितृमन्तोमातुरप्येवमवस्थितायाः। एतच्चनद्वयं कार्य्याच्चमे दीर्घरोगिनि च पितरि विभागं निषिद्धैव ज्येष्ठोगृहं चिन्तयेत् तदनुज्ञोवा कार्य्य शब्दत्वाच्च अनुमतिस्त्वप्रतिषेधादपि भवति ॥

स्वद्रव्यं दीयमानञ्च यःस्वामी ननिवारयेत्। ऋत्विग्भिर्व्वापरैर्व्वापि दत्तं तेनैव तद्भृगुरिति प्रायश्चित्तविवेकधृतकात्यायनवचनात् अतएव परमतमऽप्रतिसिद्धमनुमतं भवतीति न्यायविदः। एवं दत्तानिवारणत्वात् सिद्धिरिति ॥

॥ अथ वृत्तविभागसन्देहनिर्णयः ।

शङ्खः। गोत्रभागविभागार्थे सन्देहे समुपस्थिते। गोत्रजैश्चापरिज्ञाते कुलं साक्षित्वमर्हति ॥ गोत्र भागविभागार्थे सन्देहइति गोत्रलब्धविभजनीय

Digitized by Google

विभजनविषयके वृत्तविभागवैपरीत्यसन्देहे विभागकरणसन्देहे चकुलं बन्धुः एषामभावएवान्यः साक्षी तल्लेख्यमाह ॥

बृहस्पतिः। भ्रातरःसंविभक्तायेस्वरुच्यातु परस्परं। विभागपत्रं कुर्व्वन्ति भागलेख्यं तदुच्यते॥ व्यवहारमातृकायां बृहस्पतिः। यद्येकशासने ग्रामक्षेत्रारामाश्च लेखिताः। एकदेशोपभोगेपि सर्व्वे भुक्ता भवन्ति ते॥ शासनं पत्रादि तदेकदेशस्यानुपभोगे तु सर्व्वस्य क्रीतादेर्हानि र्यथासएव ॥

संविभागक्रयप्राप्तं पित्र्यं लब्धञ्चराजतः। स्थावरं सिद्धिमाप्नोति भुक्त्या हानिमुपेक्षया ॥ प्राप्तमात्रं येन भुक्तं खीकृत्यापरिपन्थितं। तस्य तत्सिद्धिमाप्नोति हानिश्चोपेक्षया तथा ॥ सम्विभागक्रयादिलब्धस्यैव सति भोगे सिद्धिः तद्भोगोपेक्षया हानिरिति ॥

नारदः। दानग्रहणपश्चन्नगृहक्षेत्रपरिग्रहाः। विभक्तानां पृथग्ज्ञेयाः पाकधर्म्मागमव्ययाः ॥ साक्षित्वं प्रातिभाव्यञ्च दानं ग्रहणमेवच। विभक्ता भ्रातरः कुर्य्युर्नाविभक्ताः परस्परं॥ येषामेताः क्रिया लोके प्रवर्त्तन्ते खकृत्यतः। विभक्तानवगच्छेयुर्लेख्यमप्यन्तरेण तान्॥

Digitized by Google

अतएव याज्ञवल्क्यः। भ्रातॄणामथ दम्पत्योः पितुः पुत्रस्य चैवहि। प्रातिभाव्यमृणं साक्ष्यमविभक्ते न तत्स्मृतं॥ परस्परमिति शेषः यद्यपि जायापत्योर्वि भागोन विद्यते तथा पुण्यापुण्यफलेषु चेत्यापस्तम्बो क्तेर्व्विभागाभावः। पत्यधिकरणेऽपि जीवत्यतिधन मात्रे स्वत्वं युक्तञ्च। दम्पत्योर्म्मध्यगं धनमित्युक्तं इतिश्राद्धविवेकः। मध्यगमुभयस्वामिकमित्यर्थः। तथापि यदिकुर्य्यात् समानांशान्पत्न्यः कार्य्याः समांशिकाइतियाज्ञवल्क्येन पुत्रविभागकरणे प्रवृ त्तस्याऽपुत्रपत्न्याअपि विभागावगतेस्तदभिप्रायेण दम्पत्योरित्युक्तं। यत्तु भार्य्यापुत्रश्च दासश्च त्रय एवाधनाः स्मृताः। इत्यत्राधनत्वश्रुतेरापस्तम्बीया विभागाभिधानं वैदिककर्म्ममात्रे सहकारित्वेनाधि कारार्थमिति। तन्न तद्वचनोत्तरार्द्धे यत्ते समधि गच्छन्ति यस्यैते तस्य तद्धनमित्यनेन स्वार्जितस्यैव पत्न्यादीनां पत्याद्यनुमतिमन्तरेणास्वातन्त्र्यप्रति पादनात्। आपस्तम्बवचने तथापुण्यापुण्यफलेषु चेतिपृथगुपादानाच्च तस्माद्विभागोन विद्यतइति निषेधस्य प्रवृत्तिपूर्व्वकत्वादेकस्मिन् धने उभयोः

Digitized by Google

स्वत्वं ज्ञाप्यते। अन्यथोभयोः स्वत्वाभावेन विभाग प्रश्नस्यनुपपत्तेर्निषेधविधिर्न स्यात् ॥
एकत्वं सागता यस्माच्चरुमन्त्राज्ज्ञतिभ्रतैरिति लघु हारीतोक्तैकत्वस्यैतदपिफलं ॥

॥ अथ चिरप्रोषितागतस्य वंशस्य विभागः ॥

तत्र बृहस्पतिः। गोत्रसाधारणं त्यक्त्वा योन्यदेशं समाश्रितः । तद्वंशस्यागतस्यांशः प्रदातव्योन संशयः॥ तृतीयः पञ्चमश्चैव सप्तमोवापि यो भवेत्। जन्मनामपरिज्ञाने लभेतांशं क्रमागतं॥ यं परम्य रया मौलाः सामन्ताः स्वामिनं विदुः। तदन्वयस्या गतस्य दातव्या गोत्रजैर्मही॥ भुक्तिस्त्वेपुरुषैसिद्धे दपरेषां नसंशयः। अनिवृत्ते सपिण्डत्वे सकुल्यानां न सिध्यति॥ अस्वामिना तु यद्भुक्तं गृहक्षेत्रापणा दिकं। सुहृदन्वयसकुल्यस्य ननक्षोगेन क्षीयते॥ विवा ह्यश्रोत्रियैर्भुक्तं राज्ञामात्यैस्तथैवच। सुदीर्घेणापि कालेन तेषां सिद्धति तत्तुन॥ गोत्रसाधारणं द्रव्य मितिशेषः आपणः पण्यवीथिका। अपरेषां गोत्र जादपरेषां विवाह्योजामाता इतिव्यवहारचिन्ता मणिः॥

Digitized by Google

नारदः। अन्यायेनापि यद्भुक्तं पित्रा पूर्व्वतनैस्त्रिभिः। नतच्छक्यमपाकर्त्तुं क्रमात्त्रिपुरुषागतं ॥ पित्रा पूर्व्वतनैरित्यत्रपित्रा सह पितरमादायत्रिभिस्चतुर्थैः समवाप्नुयादिति वचनार्थः। भोगं विशिनष्टि व्यासः पिता पितामहोयस्य जीवेच्च प्रपितामहः। त्रयाणां जीवतां भोगोविज्ञेयस्त्वेकपूरुषः ॥ युग पद्भोगे षष्टिवर्षेपि न त्रैपुरुषिकः प्रपितामहस्य तत्र स्वातन्त्र्यात् तस्यैव भोगः तदाकोनामासावित्याह विज्ञेयस्त्वेकपूरुषइति ॥

त्रिपुरुषं विशेषयति व्यासः। प्रपितामहेन यद्भुक्तं तत्पुत्रेण विनाच तं तौ विना यस्य पित्रा च तस्य भोगस्त्रिपौरुषः ॥ कियन्तं कालमेकैकस्य भोगइत्यपेक्षायां व्यासः। वर्षाणि विंशतिं भुक्ता स्वामिना व्याहृता सती। भुक्तिः सा पौरुषी भूमेर्दिगुणाच दिपौरुषी ॥ त्रिपौरुषी च त्रिगुणा नतत्राऽन्वेष्य आगमः ॥ अत्राव्याहृतेति प्रतिवादिसमक्षं लक्ष्यते षष्टिवर्षभोगस्याप्यनेनैकवाक्यत्वं। अतःपुनरुपेक्षया स्वत्वनाशाद्दृढस्मृतिरपि आहर्त्ता शोधयेत्

Digitized by Google

भुक्तिमागमच्चापि संसदि । तत्सुतोभुक्तिमेवैकां पैत्र्यादिषु न किञ्चन ॥

याज्ञवल्क्यः । आगमस्तु कृतोयेन सोभियुक्तैस्तमुद्धरेत् । न तत्सुतस्तत्सुतोवा भुक्तिस्तत्र गरीयसी ॥

भुक्तिशोधनमाह कात्यायनः । आगमोदीर्घकालश्च निश्छिद्रोन्यरवोज्झितः । प्रत्यर्थिसन्निधानञ्च पञ्चाङ्गोभोगदृष्यते ॥

॥ अथ विभागकाले निह्नुतस्य पश्चाद्वगतस्य विभागः ॥

तत्र कात्यायनः । प्रच्छादितन्तु यद्येन पुनरागत्य तत्समं । भजेरन् भ्रातृभिः सार्द्धमभावे तु पितुः सुताः ॥ अन्योन्यापहृतं द्रव्यं दुर्विभक्तञ्च यद्भवेत् । पश्चात्प्राप्तं विभज्येतसमभागेन तद्गृगुः ॥ पश्चात्प्राप्तमित्युपादानात् विभक्ते सति लौकिकप्रमाणेन यस्य कस्यचिन्निह्नुतस्य प्रदर्शनं विनापिन पुनर्विभागोनवा तत्र दिव्यं विना क्वचिदप्यनिश्चितद्रव्यत्वेन सम्यग्विभागो न स्यात् ॥ दुर्विभक्तमिति अस

Digitized by Google

म्यग्विभागस्य पुनर्व्विभागंदर्शयति। सकृदंशोनिपतति सकृत् कन्या प्रदीयते। सकृदाहददानीति त्रीण्येतानि सतां सकृत्॥ इति मनुनारदकात्यायनवृहस्पतिवचनेपि स्वेच्छापदोपादानं सम्यग्विभागविषयं॥

येनांशोयादृशोभुक्तस्तस्य तन्न विचालयेत्। स्वेच्छाकृतविभागोयः पुनरेव विसम्वदेत्॥ स राज्ञांशे स्वके स्थाप्यः शासनीयोऽनुबन्धकृदितिरत्नाकरधृतवृहस्पतिवचनेपि स्वेच्छाकृतपदोपादानात् स्वारसिकन्यूनाधिकपरं नतु भ्रान्त्यादिकृतदुर्व्विभागपरं। पश्चात् प्राप्तमित्यनेन तन्मात्रस्यैव विभागोनपूर्व्वविभक्तं विजनीयमित्यवगम्यते। समभागेनेति अपहर्त्तुरपहर्त्तृतया भागोन देयोऽल्पोवा देयइति निरासार्थं भृगुराहेति शेषः वाक्यार्थकर्म्मताच अविभक्तत्वादेव विभागे प्राप्ते वचनारम्भ स्यैर्य्यदोषाभावं ज्ञापयतीति विश्वरूपहलायधप्रभृतयः स्तेयधात्वर्थानिष्पत्तिरित्यभिप्रायः। तथाहि यत्परद्रव्यहरणं स्तेयं तत्परिकीर्त्तितमितिकात्यायनवचने परशब्दादात्मीयत्वव्यवच्छेदेनैव पर

Digitized by Google

कीयत्वस्यापगमात्। यथामुद्गापचारे प्रतिनिधित्वेन माषप्राप्तादेव अयञ्चियावै माषा इतिमाषानिषिद्धाः। तत्र माषमात्रारब्धकमिश्रितानां निषेधोनतु माषं मुद्गोभयारब्धकमिश्रितानां तथात्वापि परमात्रद्रव्यस्यापहारएवस्तेयं नतु स्वपरसाधारणस्याविभक्तदायस्य भोगादिनेति साधारणासाधारणयोश्चासाधारणस्यैव शीघ्रप्रतीतिरिति। अतएव परकीयत्वेन विशेषतोजाननस्तदपहारे स्तैन्यं नतु स्वद्रव्यभ्रमेण परद्रव्यव्यवहर्त्तुरपीति जिनेन्द्रदायभागप्रायश्चित्तविवेकस्तन्मतं। तत्र स्वीयबुद्ध्या परकीयापहारे यदस्तेयत्वमुक्तं तन्न समीचीनं भागवतीयनृगोपाख्यानविरोत्। तथाहि कस्यचिद्विजमुख्यस्य भ्रष्टा गौर्मम मोधने। संपृक्ताऽविदुषा साच मया दत्ता द्विजातये॥ तां नीयमानं तत्स्वामी दृष्ट्वोवाच ममेति च। ममेयं प्रतिगृह्याह नृगोमे दत्तवानिति॥ विप्रौ विवदमानौ मामूचतुः स्वार्थसाधकौ। भवान् दातापहर्त्ता च तच्छ्रुत्वा मेऽभवद्भ्रमः। तत्पापात् कृकलाशत्वं प्राप्तिश्चमे यथाभवत्। तावद्ब्राह्मणमात्मानं कृकलाशतनं प्रभोरति। यत्तु अनेकेषां

Digitized by Google

मङ्गरीयकसमुदये सदृशतया आत्मीयाङ्गुरीयक भ्रमेण परकीयाङ्गुरीयकविक्रये न स्तेयत्वं तद् विशेषचिह्नितद्रव्याणां कपर्दकादीनां नानास्वामि कानामेकत्र स्थापनदशायामेव परस्परद्रव्यविनि मयादेव परस्परविनियोगे दोषाभावदत्यवगत्य एकत्र स्थापनात् अन्यथा दोषशङ्कया न तथा कुर्य्यादिति एतद्विषये॥

मत्स्यपुराणं। अज्ञानाद्यः पुमान् कुर्य्यात् पर द्रव्यस्य विक्रयं। स निर्दोषोऽज्ञानपूर्व्वं चौरवद्दण्ड मर्हतीति एतदज्ञानकृतदण्डाभावपरमिति॥

तेन परमात्मस्वत्वावच्छिन्नद्रव्ये परमाणुमति मन्तरेण ममेदं यथेष्टविनियोज्यमिति कृत्वा व्यव हारः स्तेयं। सच क्वचिन्मानसः सङ्कल्परूपः क्वचित् कायिकोदानविक्रयादिलक्षणः तस्य चाविभक्त भ्रात्रादिधनेषु सम्भवः। इदंपरकीयमेव इदंममै वेतिविशेषानिश्चयात्॥

अतएव कात्यायनः बन्धुनापहृतं द्रव्यं बला देव प्रदापयेत्। बन्धूनामविभक्तानां भोगं नैव प्रदापयेत्। अत्रापहृतपदं भाक्तं सामादिना

प्रदापयितव्योनतु बलात् अविभक्तेन यद्यधिकं भुक्तं तदसौ न दाप्यः । एवञ्च निधेर्लाभेऽपिन दोषोनष्टस्वामिकत्वात् ॥

तथाच मनुः राजा लब्धा निधिं दद्याद्विजेभ्यो ऽर्द्धं द्विजः पुनः । विद्वानशेषमादद्यात् स सर्व्वस्य प्रभुर्यतः । इतरेण निधौ लब्धे राजा षष्ठांशमाहरेत् । अनिवेदितविज्ञाता दाप्यस्तं दण्डमेवच ॥ समूयवाणिजिकानान्तु नैतादृशं वचनाभावात् प्रत्युत जिह्मं त्यजेयुर्निर्लाभमिति याज्ञवल्क्यीयेन वञ्चकस्य लाभशून्यं कृत्वा त्यागउक्तः दायद्रव्य इव वाणिजिकानामेकधने ऽनेकेषां स्वत्वाभावाच्च किन्तु मिलनात्तदनिश्चय मात्रमिति ॥

॥ अथ स्त्रीधनं ॥

तत्र कात्यायनः । प्राप्तं शिल्पैस्तु यद्वित्तं प्रीत्या चैव यदन्यतः । भर्त्तुःस्वाम्यं भवेत्तत्र शेषन्तु स्त्रीधनं स्मृतं ॥ अन्यतः पितृमातृभर्तृकुलव्यतिरिक्ताद्यल्लब्धं शिल्पे नवा यदर्জ্জितं तत्र भर्त्तुः स्वातन्त्र्यं तेन स्त्रियाअपि धनं न स्त्रीधनं अस्वातन्त्र्यात् एतद्व्यातिरिक्तधने स्वत्वं स्त्रियाएव दानाद्यधिकारात् ॥

Digitized by Google

मनुविष्णू। पत्यौ जीवति यः कश्चिदलङ्कारोधृतो भवेत्। न तं भजेरन् दायादाभजमानाः पतन्ति ते॥ पत्युरदत्तेऽपि तदनुज्ञया परिहितोऽलङ्कार स्तावतैव भार्य्यायाः स्वीयोभवतीति मेधातिथिः॥

कात्यायनः। ऊढया कन्यया वापि पत्युः पित्र गृहेऽथवा। भर्त्तुः सकाशात् पित्रोर्व्वा लब्धं सौदा यिकं स्मृतं॥ सौदायिकं धनं प्राप्य स्त्रीणां स्वातन्त्र्यमि ष्यते। यस्मात्तदाऽनृशंस्यार्थं तैर्दत्तं तत् प्रजीवनं॥ सौदायिके सदा स्त्रीणां स्वातन्त्र्यं परिकीर्त्तितं। विक्रये चैव दाने च यथेष्टं स्थावरेष्वपि॥ सुदायेभ्यः पित्रमात्रभर्त्रकुलसम्बन्धिभ्योलब्धं सौदायिकं आनृ शंस्यमनैष्ठुर्य्यं॥

नारदः। भर्त्रा प्रीतेन यद्दत्तं स्त्रियै तस्मिन्मृते पितृत्। सा यथाकाममश्नीयाद्दद्याद्वा स्थावरा दृते॥ भर्त्रदत्तविशेषणात् भर्त्रदत्तस्थावरादृतेऽन्य स्थावरं देयमेव अन्यथा यथेष्टं स्थावरेष्वपीति कात्यायनोक्तं विरुद्ध्यते। कल्पतरुरत्नाकरयोः कात्यायनः॥

Digitized by Google

अपकारक्रियायुक्ता निर्लज्जा चार्थनाशिनी।
व्यभिचाररता याच स्त्रीधनं नच सार्हति॥

याज्ञवल्क्यः दुर्भिक्षे धर्म्मकार्य्ये वा व्याधौ संप्रतिरोधके। गृहीतं स्त्रीधनं भर्त्ता नाकामो दातुमर्हति। संप्रतिरोधके भोजनाद्यवरोधकारिण्युत्तमर्णादिके। अन्यत्रतु॥

कात्यायनः। न भर्त्ता नैवच सुतोन पिता भ्रातरो नच आदानेवा विसर्गेवा स्त्रीधने प्रभविष्णवः॥

॥ अथ स्त्रीधनाधिकारिणः॥

देवलः सामान्यं पुत्रकन्यानां मृतायां स्त्रीधनं विदुः। अप्रजायां हरेद्भर्त्ता माता भ्राता पिता पिवा॥ अत्र द्वन्द्वनिर्देशात् पुत्रकन्ययोस्तुल्याधिकारः अन्यतराभावे ऽन्यतरस्य तद्धनं एतयोरभावे जढाया दुहितुः पुत्रवत्याः सम्भावित पुत्रायाश्च तुल्याधिकारः स्वपुत्रद्वारेण पार्व्वणे सपिण्डीकरणादूर्द्ध्वं यत्पितृभ्यः प्रदीयते। सर्व्वेषां ग्रहरा माता इतिधर्म्मेषु निश्चयः। इति भ्राता तपोक्तत्वाद्भोग्यपतिपिण्डदानसम्भवात्॥

Digitized by Google

तथाच नारदः । पुत्राभावेतु दुहिता तुल्य सन्तानदर्शनात्। अतएव एतादृशदुहित्रभावे पौत्राधिकारः तदभावे दौहित्राधिकारः दौहित्रोपि ह्यमुत्रैनं सन्तारयति पौत्रवदिति मनु वचने । दौहित्रे पौत्रधर्म्मातिदेशात् पुत्रेण परिणीतदुहितुर्व्वाधाद्बाधकपुत्रेणवाध्यदुहितृपुत्र बाधस्य न्याय्यत्वात् एवं तदभावे प्रपौत्रः तन्नो ग्यपिण्डदाढ्यत्वात् तदभावे बन्ध्याविधवयोर्माढ्र धनाधिकारः तयोरपितत्प्रजात्वात् तदभावे तु भर्त्ता । एतच्च न पितृमातृदत्तधनविषयं तत्र भ्रातुरधिकारात्॥

तथाच वृद्धकात्यायनः । पितृभ्याञ्चैव यद्दत्तं दुहितुः स्थावरन्धनं । अप्रजायामतीतायां भ्रातृ गामि तु सर्व्वदा ॥ मातुः परिणयनकाललब्धन्तु पुत्रसत्वेपि क्रमेणानूढोढदुहित्रोरेवाधिकारः मातुः पारिणाय्यं स्त्रियो विभजेरन्निति वशिष्ठोक्तेः। स्त्रीधनं दुहितॄणामप्रत्तानामप्रतिष्ठितानाञ्चेति गौतमवचनेन प्रथममप्रत्तानामवाग्दत्तानां तद्

भावेत्वप्रतिष्ठितानां वाग्दत्तानां ईषदर्थे नञ् तदभावे चकारसमुच्चितानामूढानां स्त्रीधनं दुहितृणामिति सामान्यतः प्रागुक्तत्वात् अप्रत्ता नामित्यादेस्तु। क्रमार्थत्वेनोपसंहारार्थत्वात्॥

व्यक्तमाह मनुः मातुश्च यौतुकं यत्स्यात् कुमारीभाग एव सः इति यौतुकपदं युमिश्रणे इत्य स्मात् सिद्धं मिश्रताच स्त्रीपुंसयोर्विवाहाङ्गवति॥ यदेतद्धृदयन्तव तदस्तु हृदयं मम यदिदं हृदयं मम तदस्तु हृदयं तवेतिमन्त्रलिङ्गात् यौतकं तदिति वाचस्पतिमिश्ररायमुकुटधृतात् यौतकं यौतुकमपि साधु। परिणयनकालः परिणयन पूर्व्वापरी भूतकालः सच वृद्धिश्राद्धारभ्भपत्यभि वादनान्तोविवाहतत्त्वे विवृतः॥

यत्तु मनुवचनं स्त्रियास्तु यद्भवेद्दित्तं पित्रा दत्तं कथञ्चन। ब्राह्मणी तद्धरेत् कन्या तदपत्यस्य वाभवे दिति तत्पित्रा दत्तमिति विशेषणाद्विवाहसमया दन्यदापि पित्रदत्तं कन्यायाएवेत्येतदर्थं ब्राह्मणी पदन्तु कन्यामात्रपरं। यद्वा क्षत्रियादिस्त्रीणामनप त्यानां पित्रदत्तं धनं सपत्नीदुहिता ब्राह्मणी

Digitized by Google

कन्या हरेत् नपुनरप्रजस्त्रीधनं भर्त्तुरिति वचनाव काशदृतिवचनार्थः । तदभावे पुत्राधिकारः दुहितृणामभावेतु रिक्थं पुत्रेषु तद्भवेदिति मनु वचनात् एवं पुत्राधिकारात् प्राग्दुहित्रधिकार विधायकवचनान्तराण्यप्येतद्विषयकानि पुत्राद्य भावेतु ब्राह्म्यादिपञ्चकविवाहकालीनं स्त्रीधनं भर्त्तुः आसुरादित्रय विवाहकालीनन्तु मातुस्तद् भावे पितुः ॥

यथा मनुः ब्राह्म्यदैवार्षगान्धर्व्वप्राजापत्येषु यद्वनं । अतीतायामप्रजायां भर्त्तुरेव तद्दिष्यते ॥ यत्त स्याः स्याद्वनं दत्तं विवाहेष्वासुरादिषु । अतीतायाम प्रजायां मातापित्रोस्तद्दिष्यते । कन्याधनाधिकारे क्रममाह वौधायनः । रिक्थं मृतायाः कन्याया गृह्णीयुः सोदराः स्वयं । तदभावे भवेन्मातुस्तदभावे भवेत्पितुः ॥ अत्र क्रमदर्शनात् पूर्व्ववचने माता पित्रोरित्यत्र पाठक्रमेणाधिकारोनतु द्वन्द्वनिर्द्देशात् समुच्चितेन ॥

बृहस्पतिः मातुःस्वसा मातुलानी पितृव्यस्त्री पितृस्वसा । श्वश्रूः पूर्व्वजपत्नीच मातृतुल्याः प्रकी

Digitized by Google

र्त्तिताः ॥ यदासामौरसोनस्यात् सुतोदौहित्रएव वा तत्सुतोवा धनन्तासां स्वस्रीयाद्याः समाप्नुयुः ॥ औरसपदं कन्यापुत्रोभयपरं सुतदृतिसपत्नीपुत्र परं ॥

सर्व्वासामेकपत्नीनामेका चेत्पुत्रिणी भवेत्। सर्व्वास्तास्तेन पुत्रेण प्राह पुत्रवतीमनुरितिमनु स्मृतेः।एकपत्नीनामिति एकःपतिर्यासांताः नतु सुत पदमौरसविशेषणं वैयर्थ्यात् सपत्नीपुत्रसद्भावे स्वस्रीयाद्यधिकारापत्तेश्च तत्सुतदृति पौत्रसपत्नी पौत्रपरं नतु दौहित्रपुत्रपरं तस्य स्वभोग्यभर्त्तृ पिण्डदानानधिकारात् अत्र प्रागुक्तानुसारात् दौहित्रपर्य्यन्तानन्तरमेव सपत्नीपुत्रतत्पुत्रयोर धिकारः नतु प्रागुक्तभर्त्रादिपिढपर्य्यन्ताभावेपी तिवाच्यं भर्त्रादीनां धनिभोग्यपार्व्वणपिण्डदाना नधिकारात् तस्मादेतेषां सपत्नीपौत्रान्तानां तत्सुतोवेति वाशब्दसमुच्चितानां सामान्यं पुत्र कन्यानां मृतायां स्त्रीधनं विदुः। अप्रजायां हरे द्भर्त्ता माताभ्राता पितापित्रा इति देवलोक्तानां भर्त्रादिपिढपर्य्यन्तानाञ्चाभावएव सत्स्वपिश्वशुर

Digitized by Google

भ्रातृश्वशुरादिषु स्वस्रीयाद्या इत्यनेन भगिनी सुतभर्तृभागिनेयभर्तृज्येष्ठकनिष्ठोभयरूप भ्रातृसु तस्वभ्रातृपुत्रजामातृदेवराणां मातृस्वस्रादिधने ऽधिकारः अनन्यगतेर्व्वचनात्॥

अत्र त्रयाणामुदकक्रियार्थं त्रिषु पिण्डः प्रवर्त्तते। चतुर्थः संप्रदा तेषां पञ्चमोनोपपद्यतइति दाय भागप्रकरणीयमनुस्मृतेः पिण्डदोंऽशहरइति याज्ञ वल्क्यीयात् मातृतुल्याः प्रकीर्त्तिताइत्यनेन स्वस्रीयादीनां पुत्रत्वज्ञापनेन पिण्डदत्तस्वचनस्य दायभागप्रकरणे उपकारतारतम्येन धनाधि कारक्रमज्ञापनेनैकप्रयोजनकत्वात्॥

मातुलोभागिनेयस्य स्वस्रीयोमातुलस्य च। श्वशु रस्य गुरोश्चैव सख्युर्मातामहस्य च। एतेषाञ्चैव भार्य्याभ्यः स्वसुर्मातुः पितुस्तथाः पिण्डदानन्तु कर्त्तव्यमिति वेदविदां स्थितिरिति ज्ञातातपवच नात् पिण्डदानविशेषेणैव षण्णामेषामधिकार क्रमः प्रतिपत्तव्यः पाठक्रमादर्थक्रमस्य बल वत्वात् अन्यथा सर्व्वशेषे देवराधिकारे महाजन विरोधःस्यात्। तत्र प्रथमं देवरः तत्पिण्डतद्भर्त्तृ

पिण्डतङ्गर्त्तृदेयपुरुषत्रयपिण्डदत्वात् सपिण्ड त्वाच्च भ्रातृस्त्रीधनेऽधिकारी तदभावे भ्रातृश्वशुर देवरयोः सुतौ तत्पिण्डतङ्गर्त्तृपिण्डतङ्गर्त्तृदेय पुरुषद्वयपिण्डदत्तात् सपिण्डत्वाच्च तयोरभावे त्वसपिण्डोपि भगिनीपुत्रस्तत्पिण्डतत्पुत्रदेयतत्पु त्रादिपिण्डत्रयदत्वात्तदभावे भर्त्तृभागिनेयः पुत्राङ्गर्त्तुर्दुर्व्वलत्वेन तत्स्थानपातिनोरपि भगि नीपुत्रभर्त्तृभागिनेययोस्तथैव बलावलस्य न्याय त्वेन तङ्गर्त्तृदेयपुरुषत्रयपिण्डदत्वात् तत्पिण्ड दत्वात् तङ्गर्त्तृपिण्डदत्वाच्च मातुलानी धनेऽ धिकारी तदभावे भ्रातृपुत्रः तत्पिण्डतत्पुत्र देयतत्पित्रादिपिण्डद्वयदत्वात् पितृस्वसुर्धनेऽधि कारी तदभावे श्वशुरयोः पिण्डदाना ज्जामाता श्वश्रूधनेऽधिकारीतिक्रमः स्वस्त्रीयाद्या इतित्वऽधि कारिमात्रपरं न पाठिकक्रमपरं एषां षण्णां प्रातिस्विकोक्तानामभावे सपिण्डानन्तर्य्येणश्वशु रादिवदधिकारी नच सपिण्डाभावे मातृस्व सेति वचनं वाच्यं अस्मिन्नऽधिकारिगणने देवर

Digitized by Google

तत्सुतभ्रातृश्वशुरसुतानामधिकारज्ञापनादासन्न तरश्वशुरभ्रातृश्वशुरादेः परित्यागादिति॥

॥ अथापुत्रधनाधिकारिणः॥

याज्ञवल्क्यः। पत्नी दुहितरश्चैव पितरौ भ्रातर स्तथा। तत्सुतोगोत्रजोबन्धुः शिष्यः सब्रह्मचारिणः॥ एषामभावे पूर्व्वस्य धनभागुत्तरोत्तरः। स्वर्य्यातस्य ह्यपुत्रस्य सर्व्ववर्णेष्वयं विधिः॥

तथा विष्णुः। अपुत्रस्य धनं पत्न्यभिगामि तद्भावे दुहितृगामि तद्भावे दौहित्रगामि तद्भावे पितृगामि तद्भावे मातृगामि तद्भावे भ्रातृगामि तद्भावे भ्रातृपुत्रगामि तद्भावे सकुल्यगामि तद्भावे बन्धुगामि तद्भावे शिष्यगामि तद्भावे सहाध्यायिगामि तद्भावे ब्राह्मणधनवर्ज्जं राजगामीति॥ अत्रापुत्रपदं पुत्रपौत्रप्रपौत्राभावपरं तेषां पार्व्वणपिण्डदातृत्वाविशेषात् अतएव वौधायन वचने पुत्रपौत्रप्रपौत्रानुपक्रम्य सत्स्वङ्गजेषु तद्गामी ह्यर्य्योभवतीत्युक्तं तद्यथा प्रपितामहः पितामहः पिता स्वयं सोदर्य्याभ्रातरः सवर्णायाः पुत्रः पौत्रः

Digitized by Google

प्रपौत्रएतानविभक्तदायादान् सपिण्डानाचष्टते विभक्तदायादान् सकुल्यानाचष्टते सत्वप्रजेषु तद्गामी ह्यर्थोभवतीति । अस्यार्थः पित्रादिपिण्डचयेषु सपिण्डनेन भोक्तृत्वात् पुत्रादिभिस्तत्पिण्डस्यैव दानात् यश्च जीवन् यत्पिण्डदाता स मृतः सन् सपिण्डनेन तत्पिण्डभोक्ता एवं मध्यस्थितः पुरुषः पूर्व्वेषां जीवन् पिण्डदाता मृतश्च तत्पिण्डभोक्ता परेषां जीवतां पिण्डसम्प्रदानभूतआसीत् मृतैश्च तैः सह दौहित्रादि देयपिण्डभोक्ता अतोयेषामयं पिण्डदाता ये वा तत्पिण्डदातारस्ते अविभक्तं पिण्डरूपं दायमश्नन्तीति अविभक्तदायादाः सपिण्डाः पञ्चमस्य पूर्व्वस्य मध्यमः पञ्चमेन पिण्डदाता न च तत्पिण्डभोक्ता एवमधस्तनोऽपि पञ्चमेन मध्यमस्य पिण्डदाता नापि तत्पिण्डभोक्ता तेन वृद्धप्रपिता महात् प्रभृतित्रयः पूर्व्वपुरुषाः प्रतिनप्तृतः प्रभृत्य धस्तनास्त्रयः पुरुषाएकपिण्डभोक्तृत्वाभावादविभक्तदायादाः सकुल्याइत्याचक्षते । इदं सपिण्डत्वं सकुल्यत्वञ्च दायग्रहणार्थमित्युक्तं अशौचविवाहा

Digitized by Google

यर्थञ्च पिण्डलेपभुजामपीति विवृतं भूयस्तत्त्वे। पुत्रादिविभागक्रमं व्यक्तमाह रत्नाकरधृत कात्या यनः। अविभक्ते मृते पुत्रे तत्सुतं रिक्थभागिनं। कुर्वीत जीवनं येन लब्धं नैव पितामहात्॥ लभे तांशं स पित्र्यन्तु पितव्याप्तस्य वा सुतात्। सएवां शस्तु सर्व्वेषां भ्रातॄणां न्यायतोभवेत्॥ लभेत तत्सुतोवापि निवृत्तिः परतोभवेत्। जीवनं जीवनो चितद्रव्यं यदा भ्रातॄणां कश्चिदेकोन विद्यते तदा तत्सुतस्य पित्र्यंशोदातव्यः यदा विपन्नस्याप्यनेक पुत्रास्तदा एकः पित्र्यंशस्तेषां विभज्य दातव्यः एवं तत्सुतोऽप्यंशं लभेत तत्सुतस्य भागोनिवर्त्तत इत्यर्थः एतच्च सहवासविषयं॥

यथा देवलः। अविभक्तविभक्तानां कुल्यानां वसतां सह। भूयोदायविभागः स्यादाचतुर्थादिति स्थितिः॥ अविभक्तानां विभक्तानां सहवसतां संसृष्टानां वा पुनर्व्विभागोभ्रातृतत्सुततत्सुतपर्य्य न्तमेव तत्सुताच्चतुर्थान्निवर्त्तते इति प्रागुक्तसप्तम पुरुषपर्य्यन्तं विभागदानन्तु भिन्नदेशादागताना

मिति न विरोधः तेन प्रपौत्रपर्य्यन्तानामभावे पत्नी धनाधिकारिणी ॥

यथा कात्यायनः । भर्तृदायं मृते पत्यौ विन्यसेत् स्त्री यथेष्टतः । विद्यमाने तु संरक्षेत् क्षपयेत्तत्कुलेऽन्यथा ॥ अपुत्रा शयनं भर्तुः पालयन्ती व्रते स्थिता । भुञ्जीतामरणात् क्षान्ता दायादाऊर्द्ध्वमाप्नुयुः । यथेष्टतइति धर्म्मार्थं ॥

तथाच व्यासः । लोकान्तरस्थं भर्त्तारमात्मानञ्च वरानने । तारयत्युभयं नारी नित्यं धर्म्मपरायणा ॥ मदनपारिजातधृतास्मृतिः । यद्यदिष्टतमं लोके यच्च त्यत्युः समीहितं । तत्तद्गुणवते देयं पतिप्रीणन काम्यया ॥ भर्तुः शयनं पालयन्ती नान्यगामिनी । अतएव हरिवंशीयपुण्यकव्रतोपाख्याने दानोपवासपुण्यानि सुकृतान्यप्यरुन्धति । निष्फलान्यस तीनां हि पुण्यकानि तथा प्रभे ॥

तथा बृहन्मनुः । अपुत्रा शयनं भर्तुः पालयन्ती व्रते स्थिता । पत्येव दद्यात् तत्पिण्डं कृत्स्नमंशं लभेत च ॥ तत्पिण्डमित्यत्र तदित्यनुषज्यते तच्छब्देन भर्तृः परामर्शाद्भर्तुः कृत्स्नमंशं यावदंशं

Digitized by Google

हरेत् न तु वर्त्तनजीवनोचितमात्रं पत्नी सवर्णा ज्येष्ठा पत्नीत्यभिधानात् ॥

ज्येष्ठत्वमाह मनुः । यदि स्याश्च पराश्चैव विन्देरन् योषितोद्विजाः । तासां वर्णक्रमेणैव ज्यैष्ठं पूजा च वेश्म च । तदन्यस्याभार्य्यायाः पोषणमात्रमाह ।

नारदः । भ्रातृणामप्रजः प्रेयात् कश्चिच्चेत्प्रव्रजेच्च वा । विभजेरन् धनन्तस्य शेषास्ते स्त्रीधनं विना ॥ भरणञ्चास्य कुर्व्वीरन् स्त्रीणामाजीवनञ्च यात् । रक्षन्ति शय्यां भर्त्तुश्चेदाक्षिण्वुरितरासु च । प्रेयात् म्रियेत एवं पत्नीभार्य्याभेदात् ॥

ततोदायमपुत्रस्य विभजेरन् सहोदराः । तुल्या दुहितरोवापि म्रियमाणः पितापि वा ॥ सवर्णा भ्रातरोमाता भार्य्या चैव यथाक्रमं । तेषामभावे गृह्णीयुः कुल्यानां सहवासिनः इत्यादिवचनानि व्यवस्थेयानि म्रियमाणोजीवन् । वस्तुतस्तु एतदुक्तक्रमः सर्व्वत्र न ग्राह्यः उपकारतारतम्यमूलकवच्यमाणवचनविरोधात् अतएवात्र क्रमानास्था सूचकमपि वापीत्युक्तं पत्न्यभावे दुहितरः अत्र षड्वचनात् कन्योढादौहित्राणां परिग्रहः तत्र

कन्योढयोस्तु अपुत्रस्य मृतस्य कुमारी तदर्थं गृह्णीयात् तदभावे चोढेति पराशरवचनात् क्रमः तदभावे दौहित्रः पौत्रदौहित्रयोर्लोके विशेषो नास्ति धर्म्मतः । तयोर्हि मातापितरौ सम्भूतौ तस्य देहतइति मनुवचने पौत्रतुल्यत्वाभिधानेन यथा पुत्राभावे पौत्रः तथा दुहित्रभावे दौहित्रः अत एव गोविन्दराजधृतोविष्णुः । अपुत्रपौत्रे संसारे दौहित्राधनमाप्नुयुः । पूर्व्वेषां हि स्वधाकारे पौत्र दौहित्रकाः समाः । दौहित्राभावेपितरौ तत्र प्रथमं पिता ततोमाता पूर्व्वोक्तविष्णुस्मृतेः । तदभावे भ्रातरः अत्रापि वक्रवचनं सोदरासोदरसंसृष्टत्वभेदेनाधिकारिभेदार्थं अतएव एकपितृजात योरपि सोदरविमातृजयोर्म्मृतदेयषट्पुरुषपिण्ड दातृत्वेन सोदरस्यैव धनाधिकारीनतु पित्रादि त्रयमात्रपिण्डदातुर्विमातृजस्य क्वचित्तु संसृष्ट त्वेन विमातृजस्याप्यसंसृष्टसोदरेण सह तुल्याधि कारिता सोदरस्य संसृष्टत्वेन सएव गृह्णीयान्न संसृष्ट्यपि विमातृजइति ॥

तथाच याज्ञवल्क्यः । संसृष्टिनस्तु संसृष्टी सोदर

Digitized by Google

स्य तु सोदरः। दद्याच्चापहरेदंशं जातस्य च मृतस्य च। अन्योदर्य्यस्तु संसृष्टी नान्योदर्य्योधनंहरेत्। असंसृष्ट्यपि चादद्यात्संसृष्टोनान्यमातृजः॥ संसृष्टिनमाह बृहस्पतिः। विभक्तोयः पुनः पित्रा भ्रात्रा चैकत्र संस्थितः। पितृव्येणाथ वा प्रीत्या सतु संसृष्ट उच्यते। तेन विभागानन्तरं मैत्र्यात् पितृभ्रातृ पितृव्य भ्रातृपुत्राणां यथायथमेकत्रावस्थानं संसर्गः तद्युक्तः संसर्गी एवभूतस्य संसर्गिणोमृतस्य धनं तज्ज्ञातस्यापत्यस्य तदपत्याभावे संसर्गी स्वयं गृह्णीयात् एवं सोदरस्य तु सोदरः। अत्र विशेषयति॥

यमः। अविभक्तं स्थावरं यत्सर्व्वेषामेव तद्भवेत्। विभक्तं स्थावरं प्राप्तं नान्योदर्य्यैः कदाचन॥ सर्व्वेषां सोदरासोदराणां स्थावरातिरिक्तन्तु विभक्ता विभक्तं सोदराणामेवेत्यर्थतः सिद्धं तेषां तत्पिण्डदातृत्वेन तन्मातृभोग्यपार्व्वणपिण्डदातृत्वेन चाधिकारात्॥

व्यक्तमाह मनुः। येषां ज्येष्ठः कनिष्ठोवा हीयेतांशप्रदानतः म्रियेतान्यतरोवापि तस्य भागोन

लुप्यते। अंशप्रदानतोविभागात् पूर्व्वं चीयेत प्रव्रज्यादिनेति शेषः केषामंशविभागइत्यत्राह सएव। सोदर्य्याविभजेरंस्तं समेत्य सहिताः समं। भ्रातरो ये च संसृष्टाभगिन्यश्च सनाभयः॥

बृहस्पतिः। विभक्ताभ्रातरोये च संप्रीत्यैकत्र संस्थिताः। पुनर्विभागकरणे तेषां ज्यैष्ठं न विद्यते॥ यदि कश्चित्प्रमीयेत प्रव्रजेद्वा कथञ्चन। न लुप्यते तस्य भागः सोदरस्य विधीयते। या तस्य भगिनी सा तु ततोऽंशलब्धुमर्हति। अनपत्यस्य धर्म्मोऽयम भार्य्यापितृकस्य च। संसृष्टानान्तु यः कश्चिद्विद्या शौर्य्यादिना धनं। प्राप्नोति तस्य दातव्योऽंशः शेषाः समांशिनः॥ अत्र संसृष्टानां ज्येष्ठांशाभावो वर्णत्रयाणां बोध्यः शूद्रस्य तु सर्व्वदा ज्येष्ठांशा भावात्॥

तथाच मनुः। समवर्णासु ये जाताः सर्व्वे पुत्राद्वि जन्मनाम्। उद्धारं ज्यायसे दत्वा भजेरन्नितरे समं। शूद्रस्य तु सवर्णैव नान्या भार्य्योपदिश्यते॥ तस्यां जाताः समांशाः स्युर्यदि पुत्रशतं भवेत्। समांशाः समभागाएव भवेयुर्नोद्धारः कस्यचिद्देयइति

Digitized by Google

कुल्लूकभट्टः युक्तश्चैतत् तथाहि ज्येष्ठस्य विंश उद्धारः सर्व्वद्रव्याच्च यदरं । ततोऽर्द्धं मध्यमस्य स्यात्तुरीयन्तु कनीयसः॥ इति मनुना सामान्यतो ज्येष्ठादीनामुद्धाराभिधानात् द्विजन्मनां इत्यस्य वर्णमात्रोपलक्षकत्वग्रहानिरासायोत्तरवचनोक्त राईं न च पुत्रामनस्कत्वात्तत्वाविशेषाच्च द्रव्यस्या प्यधिकार इति वाच्यं तदनिस्तारकमध्यमकनीय सोरर्द्धपादोद्धारदर्शनेन तस्याप्रयोजकत्वात् नचो द्धारांशयोर्भेदात् समांशिताभिधानेन पूर्व्वोक्ता सवर्णाजातविषमांशभागएव शूद्रस्य निषिध्यते नोद्धार इति वाच्यं शूद्रस्य तु सवर्णेति पूर्व्वार्द्धे नैव तस्सिद्धमिति द्विजन्मनामप्युद्धारनिरासाय समांशता मनुना विहिता समानं समवर्णास्विति वचनमभिधाय द्विप्रकारोविभागस्तु दायादानां प्रदर्शितः। वयोज्येष्ठक्रमेणैकः परा समांशकल्पना। इति प्रकीर्त्तितस्त्यत्र प्रदर्शितइति वृद्धस्मृतिः अत्र भगिन्यधिकारोविवाहोचितद्रव्यलाभाय मुनिभिः संग्रहश्चाश्रित्यायोक्तत्वात् अभार्य्यापितृकस्येत्यत्र पितृपदमेकशेषात् पितृमातृपरं मातुरभावे भ्रात्र

धिकारस्य विष्ण्वादिभिरुक्तत्वात् ततश्च संदृष्टि नस्तु संदृष्टीत्येतद्वचनं तुल्यरूपसम्बन्धिसमवाये संसर्गज्ञतविशेषप्रतिपत्त्यर्थं तेन सोदराणां सापत्नानां भ्रातृपुत्राणां पितृव्याणां तुल्यानां सद्भावे संसर्गी गृह्णीयात् वाक्यादविशेषश्रुतेः पूर्ववचने सर्वेषामेव प्रकृतत्वात् सर्वेषु चाक्षेपासम्भवात् अतोन भ्रातृमात्रविषयमिदं वचनमिति जीमूतवाहनः। सोदरे त्वसंदृष्टिनि संदृष्टिन्यसोदरे च सति कतरस्तावद्गृह्णीयात् एवं सोदरासोदरयोः संदृष्टयोः सद्भावे कतरदित्यत्र प्रथमतः आह अन्योदर्य्यस्त्विति अन्योदर्य्यः पुनः संदृष्टो सन् गृह्णीयात् नान्योदर्य्यमात्रः किन्तु असंदृष्ट्यपि पूर्ववचनस्थसोदरपदानुषङ्गात् प्राप्तः सोदरश्च गृह्णीयात् तेनैकत्र विषये पूर्ववचनोक्तसंदृष्टत्व सोदरत्वयोरेकशः सम्बन्धेन तुल्यत्वादुभयोर्विभज्य ग्रहणं तदुभयसत्त्वे चासोदर्य्यस्यासंदृष्टिनोऽतुल्यरूपत्वान्नेति द्वितीयेआह संदृष्टोनान्यमातृज इति सोदरे संदृष्टिनि सति अन्यमातृजः संदृष्ट्यपि न गृह्णीयात् अर्थात्तत्र संदृष्टौ सोदरएव

Digitized by Google

गृह्णीयात् संसृष्टत्वाविशेषेऽपि सोदरत्वेन तस्यैव बलवत्त्वात्। दायभागकारस्तु अन्योदर्य्यस्तु संसृष्टी सन् सत्यपि सोदरेऽसंसृष्टिनि धनं हरेत् नान्योदर्य्यः संसृष्ट्यपि गृह्णीयादिति पूर्व्वार्द्धस्यार्थः। तत्र किं सोदरस्तदानीं न गृह्णीयादेवेत्यपेक्षायामुत्तरार्द्धेनोक्तं असंसृष्ट्यपि चादद्यात् सोदरइत्यनुषज्यते न संसृष्टोऽन्यमात्रजः केवलः किन्तु उभाभ्यामेव विभज्य ग्रहीतव्यमित्याहुः॥

मिताक्षराद्योऽप्येवं। याज्ञवल्क्यदीपकलिकायां मूलपाणिमक्षामशोपाध्यायास्तु अन्योदर्य्यस्तु संसृष्टी नान्योदर्य्यधनं हरेत्। असंसृष्ट्यपि सोदरएव गृह्णीयात् नतु संसृष्टः सापत्नोभ्राता संसृष्टइति गर्भसंसृष्टः सोदरइति केचित् नान्योदर्य्योधनं हरेदिति पाठे अन्योदर्य्यः सन् धनं न गृह्णीयादिति व्याख्या असंसृष्टिसोदरस्याधिकारार्थमिदं वचनमतोन पुनरुक्तिरित्याहुः। रत्नाकरप्रभृतयस्तु यस्तु कल्पतरौ नान्योदर्य्यधनंहरेदिति पाठोदृश्यते स मूलभूतयाज्ञवल्क्यमिताक्षरापारिजातहलायुधग्रन्थेषु नान्योदर्य्योधनं हरेदिति पाठ

Digitized by Google

दर्शनात् तदनुसारव्याख्यादर्शनाच्च लिपिकर प्रमादादित्याहुः। भ्रातॄणामभावे तत्सुतः तत्र प्रथमं सोदरपुत्रः॥

स्वेन भर्त्रा सह श्राद्धं माता भुङ्क्ते स्वधा मयं। पितामही च स्वेनैव स्वेनैव प्रपितामहीति बृहस्पतिवचनात्। सोदरभ्रातृपुत्रदत्तपिता महपिण्डे धनिमातुर्भोगश्रुतेस्तद्गतधनत्वेन तथो पकारदर्शनात् तदभावे वैमात्रेयपुत्रः तदभावे गोत्रजः। तत्र त्रयाणामुदकं कार्य्यं त्रिषु पिण्डः प्रवर्त्तते। चतुर्थः संप्रदातैषां पञ्चमोनोपपद्यते। अनन्तरः सपिण्डाद्यस्तस्य तस्य धनं हरेदिति मनूक्ता तस्य मृतस्य धनिनः सपिण्डात् सपिण्ड मध्यात् अनन्तरः सन्निहिततरस्तस्य धनं भवेत् एवमेव कुल्लूकभट्टः। बन्धोश्चातयोयत्र सकुल्या बान्धवास्तथा। योह्यासन्नतरस्तेषां सोऽनपत्यधनं हरेदिति बृहस्पत्युक्तत्वाच्च पिण्डदानसम्बन्धता रतम्येन आसन्नजननतारतम्येन च धनेष्वधि कारी तच यथा दौहित्रान्तस्वसन्तानाभावेऽ न्योऽधिकारी एवं भ्रातृपुत्राभावे तद्दौहित्रान्तः

Digitized by Google

पितुः सन्तानोऽधिकारी तदभावे पितामहः तद्भावे पितामही ॥

अनपत्यस्य पुत्रस्य माता दायमवाप्नुयात्। मातर्य्यपि च वृत्तायां पितुर्माता धनं हरेदित्यनुवचनात् यथा पित्रभावे माता तथा पितामहाभावे पितामही तदभावे पितामहदौहित्रश्चान्तसन्तानः पितरि तथा दर्शनात् एवं प्रपितामहः प्रपितामही तत्सन्तानाश्चापि मृतभोज्यपिण्डदात्रभावे बन्धुरिति मातामहमातुलादिः तत्रापि पित्रादिवत्सति मातामहे सएव तदभावे यथाक्रमं मातुलादिः मृतदेयमातामहादिपिण्डदत्वात् तदभावे सकुल्योविभक्तपिण्डः प्रतिनप्तृतः प्रभृतिपुरुषत्रयमधस्तनं वृद्धप्रपितामहादिसन्ततिश्च अतएव दायहृता ननु सहोदरभ्रातृपुत्रवत् पितृव्यस्यापि धनिदेयपूर्व्वपुरुषदर्यपिण्डदत्वात् धनिपितृव्यभ्रातृपुत्रयोस्तुल्योऽधिकारः स्यादुच्यते पितृव्योहि धनिपितामहप्रपितामहयोः पिण्डदः भ्रातृपुत्रस्तु धनिपितरं प्रधानमादाय पुरुषदर्यपिण्डदइति सएव बलवान् इति पितृव्यात्

पूर्व्वमधिक्रियते इत्युक्तं । एवं यत्र मृतस्य पितृव्यमृतपितृव्यपुत्रयोः सत्त्वे धनिदेयपितामह प्रपितामहपिण्डदातृत्वाविशेषेऽपि अनेकपितृकाणान्तु पितृतोभागकल्पनेत्यत्र जननसान्निध्यतारतम्येन भागदर्शनात् अत्रापि जननसन्निकर्षाधिक्येन पितृव्यस्यैवाधिकारः अतएव मिताक्षरायां पितामहपितृव्यतत्पुत्राः क्रमेणाधिकारिण इत्युक्तं । विवादचिन्तामणावपि अपुत्रधनाधिकारे भ्रातुरभावे तत्पुत्रः तदभावे आसन्नस पिण्डइत्युक्तं वृद्धस्त्युक्तबान्धवाइत्यनेन यथाक्रमं आसन्नपितृमातृबान्धवाधनाधिकारिणः ते च आत्मपितुःस्वसुः पुत्राआत्ममातुःस्वसुः सुताः। आत्ममातुलपुत्राश्च विज्ञेयाआत्मबान्धवाः। पितुः पितुःस्वसुः पुत्राः पितुर्मातुःस्वसुः सुताः । पितुर्मातुलपुत्राश्च विज्ञेयाः पितृबान्धवाः। मातुर्मातुःस्वसुः पुत्रामातुः पितुःस्वसुः सुताः। मातुर्मातुलपुत्राश्च विज्ञेयामातृबान्धवाः॥ आपस्तम्बः। अन्ने वासी वार्थास्तदर्थेषु धर्म्मकृत्येषु योजयेदुहिता वेति । तदर्थेषु मासिकादिना तद्भोगार्थं धर्म्म

क्षत्वेष्विति अदृष्टार्थमिति एवञ्च यस्य मृतस्य धनं देशान्तरस्थतद्धनाधिकारिसत्त्वे तद्धनविना प्रसम्भावनायां तदौर्द्ध्वदेहिककर्म्मार्थं तत्पुण्यार्थञ्च येन केनापि दातुं युक्तं ॥

यदृच्छयापि यः कुर्य्यादार्त्विज्यं प्रीतिपूर्व्वकमिति नारदवचने तस्यापि प्रतिनिधित्वात् एतत् प्रपञ्चितं प्रागद्वितत्त्वे । दायभागकृतापि सर्व्वत्रोक्तरीत्या मृतधनस्य मृतार्थत्वमनुसन्धेयमिति वदतापेतत् स्वहस्तितमिति ॥ महामहोपाध्यायश्रीहरिहरभट्टाचार्य्यात्मज श्रीरघुनन्दनभट्टाचार्य्यविरचितं स्मृतितत्त्वे दायतत्त्वं समाप्तं ॥ शकाब्दे १७५० ॥

Digitized by Google

॥ अथ व्यवहारतत्त्वस्य शुद्धिपत्रं ॥

पृष्ठे	पङ्क्तौ	अशुद्धं	शुद्धं
८	५	न्नाङ्कये	नाङ्कये
१३	१८	दूते	द्यूते
१४	१८	भत	भूत
१७	३	पर्व्वा	पूर्व्वा
१८	११	भाष	भास
२२	४	ग्राह्मं	ग्राह्यं
२८	१२	लुन्ध	लुब्ध
३३	४	धनं	धृतं
४१	१४	दुष्टं	दृष्टं
४६	१७	प्रेक्षिते	प्रेक्षते
४८	१२	मवत्ये	भवत्ये
५१	३	प्रमणं	प्रमाणं
५५	१०	मग्न्या	मग्न्य
५६	४	मल्यं	मूल्यं

Digitized by Google